॥ श्रीहरिः ॥

दशदिगन्तविजयिगोस्वामिश्रीमत्पुरुषोत्तमचरण-
विरचितदीपिकासमलंकृता

# श्रीनृसिंहोत्तरतापिन्युपनिषत्।

सा च मुम्बईस्थ
गोस्वामिकुलकौस्तुभ श्री १०८ श्रीगोकुलनाथ-
महाराजानामाज्ञया
देवर्षिरमानाथशास्त्रिणा संशोधिता
पुष्टिमार्गकार्यालयात्प्रकाशिता च।

Revised [illegible] 6-75

सं. १९८२ – व. ४४८

निर्मञ्छनम्                    पंचकलाः—

Library IIAS, Shimla
00009187

INDIAN INSTITUTE OF
ADVANCED STUDY
SIMLA

al Itchharam Desai at
PRINTING PRESS
Sassoon Buildings, Circle, Fort, Bombay

Published by Ramanath Shastri, Third Bhoiwada, Bada Mandir,
Bhuleshwar, Bombay.

9187
26.3.66
24.12.81
S
294.144
P977N

# अस्ति किञ्चिद्वक्तव्यम् ।

लब्धोऽयमवसरः कथंकथमपि प्रकाशयितुं दशदिगन्तविजयिगोस्वामिश्रीपुरुषोत्तमचरणविरचितवृत्तिसमलंकृतायाः श्रीनृसिंहोत्तरतापिन्युपनिषदः । एषा पुनर्गोस्वामिकुलकौस्तुभश्री १०८ श्रीगोकुलनाथमहाराजसंचितात्संघधनाल्लब्धावतारा । माण्डूक्यदीपिकायामिवात्रापि विरलैव वृत्तिर्दृश्यते । न हि वादिवेतण्डगण्डखण्डनपण्डितनृकेसरी श्रीपुरुषोत्तमसदृक्षः सर्वशास्त्रपारदृश्वोपनिषदुपर्येपि तथा विरलविरलां टिप्पणीमिव वृत्तिं विदध्यात् । मम त्वेवं प्रतिभाति यदुपनिषद्विवरणमेतदुद्देश एव नासीत् । किन्तु येषु येष्वक्षरेषु मायावादिभिरर्थांशं परिवर्त्य मायावादः प्रकाशितस्तेषां तेषामेवाक्षराणां वास्तवमर्थं प्रकाश्य मायावादः कथमप्येष्वक्षरेषु नास्तीति प्रकाशनमेवात्रैषामाशय इति । उपनिषद्विवरणं तु प्रतितन्त्रपण्डितैर्विहितमेवेति च । ईशादिदशोपनिषत्सु क्वचिदपि मायावादः पदं न लभते । ततश्चापाततः क्वचित्परिदृश्यमानमर्थं शब्दं चावलम्ब्य नृसिंहोत्तरतापिन्युपनिषदा मायावादमाक्रष्टुं प्रायतन्त तत्पण्डिताः । सोऽपि भवतां प्रयासो निष्फलमेवेति प्रदर्शनमेव प्राधान्यत उद्देश एतद्वृत्तिनिर्माणे श्रीपुरुषोत्तमचरणानामिति मे सुदृढो विश्वासः । तच्चात्र दृश्यते ।

सैषोपनिषत्प्रकाशिता मया श्रीपतेःपरमानुग्रहेण। निगूढमेवातिवाहिता वयं दिवसानक्षरयोजकानुग्रहेण । क्रियते किमपि ध्रियते किमपि । कतिवारं वा परिवर्त्येताम् । विषण्णा नितरामेतेन । ततश्चानुसृतां रीतिं निखिलामपि विमुच्य कथंकथमपि प्रकाशं लभतामेषेत्येव मनः संतोष्य प्रकाशमापादिता । तत एव च स्खलितान्यवशिष्टानि स्युरिति निश्चीयते तन्मयि कृपालुभिः स्वसौजन्येन यथाशोधं समीकर्तव्यानीति मे विज्ञप्तिः ।

अत्र मुद्रापणे चत्वारि प्रतिपुस्तकानि लब्धानि । एकं श्रीमद्बालकृष्णपुस्तकालयस्थं, त्रीणि च बी. ए. त्यादिपदवी समलंकृतेन श्रीमता मुलचंद्र तुलसीदास तेलीवाला गुप्तेन स्वायत्ताच्छ्रीगट्टूलालभारतमार्तण्डपुस्तकालयात्प्रदत्तानि । सोयमस्मान्प्रतिपुस्तकमुद्रणं सहायमारचयतीत्यस्मै धन्यवादाः ।

संशोधक ।

श्रीकृष्णाय नमः ।

दशदिगन्तविजयिगोस्वामिश्रीश्रीपुरुषोत्तमविरचित–

दीपिकया समलंकृता

# नृसिंहोत्तरतापिन्युपनिषत् ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ १ ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः, शान्तिः, शान्तिः ॥

ॐ देवा ह वै प्रजापतिमब्रुवन् अणोरणीयांसमिममोङ्कारं नो व्याचक्ष्वेति। ॐ तथेति–ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानम् । भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव । सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म । तमेतमात्मानमोमिति ब्रह्मणैकीकृत्य ब्रह्मचात्मना ओमित्येकीकृत्य तदेकमजरममृतमभयमोमित्यनुभूय तस्मिन्निदं सर्वं त्रिशरीरमारोप्य तन्मयं हि तदेवेति संहरेदोमिति । तं वा एतं त्रिशरीरमात्मानं परं ब्रह्मानुसन्दध्यात् ।

नृसिंहपूर्वतापिन्यां प्रजापतिना श्रीनृसिंहस्वरूपे बोधिते तन्मन्त्रराजोद्धारे च कृते प्रणवमात्राणां मन्त्रराजपादानां चैक्ये चैकार्थ्याय बोधिते देवैर्मन्त्रराजाङ्गमन्त्राः पृष्टास्तदा प्रजापतिना पूर्वं प्रणवोऽङ्गमन्त्र उक्तः । विश्वतैजसप्राज्ञतुरीयाख्यचतुष्पाद्ब्रह्मवाचकतया ब्रह्माभिन्नत्वेनोपासनार्थं व्याख्यातश्च । तत्र कालपरिच्छेद्यस्य सर्वस्य त्रिकालातीतस्य शारीरादेश्चोङ्कारत्वश्रवणात्परमात्मनश्चोङ्कारस्य चतुष्पादत्वश्रवणात्सर्वस्य तत्पादताश्रावणात्तत्र संदेहाभावेऽपि स्वस्मिंस्तादृङ्माहात्म्यशून्यतानुभवादोङ्कारात्मताविरोधे जाते प्रजापत्युक्तार्थे संदिहानैर्देवैरुत्तरतापिन्यारम्भे शारीरस्य ब्रह्माभेदज्ञानार्थमेतद्वाचकतया ॐकारव्याख्यानाय प्रजापतिश्चोदितः । **अणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्वेति** । अयं शारीरोत्यन्तमणुरसर्वरूपोऽपादरूप ॐकारवाच्यो भवितुं नार्हतीति कथमस्य त्रिकालातीतस्य परब्रह्मनृकेसर्यभिन्नत्वमतस्तद्बोधनाय येन रूपेणास्य प्रणववाच्यत्वं तद्व्युत्पादयेति चोदनाबीजम् । तदा प्रजापतिस्तथेत्यङ्गीकृत्य व्याकुर्वन् ॐमित्येतदित्यारभ्यायमात्मा ब्रह्मेत्यन्तेन ब्रह्मत्वेन रूपेणोङ्कारवाच्यत्वप्रतिज्ञां स्मारयित्वा शाब्दजातस्य कुतर्कोपघातेन तिरोभावमाशङ्क्यास्मिन् ब्रह्मरूपतानुभावनाय यतमानस्तमेतमित्यादिनाऽनुभूयेत्यन्तेनाजरामरामृताभयरूपतयोभयोरैक्यमाहार्यवृत्तिरूपप्रणवात्मनानुभवमनूद्य

१—शारीरेति ख पाठः ।

तावता तुरीयपादैकदेशसाजात्येन तदात्मकतामस्मिन्बोधयित्वा पादान्तरसाजात्याय तस्मिन्निदामित्यादिना ॐमितीत्यन्तेन शरीरत्रयारोपद्वारा सर्वस्य शारीरे संहारं विदधानः संहृतस्य शरीरत्रयस्यास्मिन् स्थित्यास्य त्रिशरीरत्वे यादृशं प्रलयकाले चतुष्पादब्रह्मरूपं तादृशमेतत्स्वरूपं भावनीयमित्याशयेन तथा भावनं विधत्ते 'तं वा एतमित्याद्यनुसंदध्या'दित्यन्तम् । उभयत्र त्रिशरीरपदाच्छारीर आरोपो, ब्रह्मणि तु प्रलयदशायामपि वास्तवं त्रिशरीरत्वमिति बोधितम् । त्रिशरीरपदेन प्राप्तं भेदं परिहर्तुं सर्वात्मकत्वाय षड्ढेतूनाह—

**स्थूलत्वात् स्थूलभुक्त्वाच्च सूक्ष्मत्वात् सूक्ष्मभुक्त्वा-**
**च्चैक्यादानन्दभोगाच्च । सोऽयमाऽत्मा चतुष्पात् ।**

'स्थूलत्वादि' त्यादि । तथा च त्रिशरीरत्वेऽपि स्थूलादिसर्वरूपत्वान्न भेदो यथा ब्रह्मणि, तथा शारीरस्याप्यारोपितशरीरत्रयस्यारोपितस्थूलादिसर्वरूत्वान्न भेद इत्यर्थः । न च शरीरत्रयकथने वैयर्थ्यं शङ्क्यम् । सर्वं ह्येतद्ब्रह्मेति पूर्वप्रतिज्ञानात् । परं चापरं ब्रह्म यदोङ्कार इतिश्रुत्यन्तराच्च । तथा चैवंभावनयाहंग्रहोपासनायामस्य स्वस्मिंस्तादृङ्माहात्म्यवत्त्वं अभेदश्च स्फुरिष्यतीति भावः । एवमयमात्मा ब्रह्मेत्यन्तो ग्रंथः सूत्ररूपोहंग्रहोपासनायोग्यप्रकारेण शारीर संग्राहकतया व्याकृतः । अतः परमेतद्वृत्तिरूपं सोऽयमात्मेत्यादिग्रन्थं सोऽयमात्मेत्यारभ्य तुरीय इत्यन्तया पूर्णकण्डिकया व्याचष्टे श्रुतौ सत्पदार्थोत्पत्त्यङ्गीकारात्सृष्टिदशायां

चतुष्पात्त्वेनाभेदभावनार्थम् । अन्यथा प्रणवप्रतिपाद्यचतुष्पादात्माभेद इदानीमस्य न स्फुरेत् । परस्परात्यन्तविलक्षणयोर्घटपटयोरिव पार्थिवत्वादिना यत्किञ्चित्साजात्येऽप्यैक्यभावनस्यात्राप्यशक्यत्वात् । तत्र बुद्धे तु चतुष्पात्त्वे साजात्यात्तुरीयाभेदोऽस्मिन्शक्यबोध इति पूर्ववत्पादत्रयमारोपयितुं पूर्वं ब्रह्मणश्चतुष्पात्त्वं प्रतिज्ञाय तत्पादत्रयं पूर्वमाह–

**जागरितस्थानः स्थूलप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभूक् चतुरात्मा विश्वो वैश्वानरः प्रथमः पादः। स्वप्नस्थानः सूक्ष्मप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः सूक्ष्मभूक् चतुरात्मा तैजसो हिरण्यगर्भो द्वितीयः पादः। यत्र सुप्तो न कंचन कामं कामयते, न कंचन स्वप्नं पश्यति तत्सुषुप्तम् । तत्सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभूक् चेतोमुखश्चतुरात्मा प्राज्ञ ईश्वरस्तृतीयः पादः । एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य, प्रभवाप्ययौ हि भूतानाम् ।**

जागरितेत्यारभ्य भूतानामित्यन्तम्। पूर्वतापिन्यां बहिःप्रज्ञपदेनोक्तोऽर्थोऽत्र स्थूलप्रज्ञपदेनोच्यते । अन्तःप्रज्ञपदार्थश्च सूक्ष्मप्रज्ञपदेन । स्थूले प्रज्ञास्य येनासौ स्थूलप्रज्ञः । स्थूलप्रज्ञत्वादयो धर्माः प्रथमपादादभिन्ना ज्ञापयितुं चतुरात्मेति । उक्तचतुष्टयात्मक इत्यर्थः । एवमग्रेऽपि । विश्वतैजसप्राज्ञानां स्वरूपं बोधयितुं वैश्वानरहिरण्यगर्भेश्वरपदानि । शेषं पूर्ववदेव च माण्डूक्यविवरणे विवृतम् ।

एवं ब्रह्मपादत्रयमुक्त्वा शारीरस्याऽऽह—

**अयमेतत्सुषुप्तं स्वप्नं मायामात्रं चिदेकरसो ह्ययमात्मा ।**

**अयमेतत्सुषुप्तं स्वप्नं मायामात्रं चिदेकरसोह्ययमात्मेति** । तथाच ब्रह्मपादानां यत्स्थानं तदाधेयारोपात्तत्पादात्मकं सदेतद्भासितत्वादेतस्य पादत्रयमित्यर्थः । न चात्रैतच्छब्देन विश्वादय एव परामृश्यन्त इति वाच्यम् । स्थानत्वोक्तिव्याकोपापातात् । अयमुद्दिश्यात्रात्मत्वविधानानङ्गीकारेण पर्वोक्तपादत्रयस्यैव मायामात्रत्वाङ्गीकारे सुषुप्तस्वप्नपदयोर्वैयर्थ्यापत्तेर्वाक्यानन्वयापत्तेश्च । एवं पादत्रयमारोपितमस्मिन्नुक्त्वा चतुर्थपादसाजात्यस्यास्मिन्सत्वात्साजात्येऽपि न्यूनत्वं बोधयितुं ब्रह्मतुरीयपादस्य मुख्यत्वंच बोधयितुं भिन्नप्रक्रमेणाऽऽह—

**अथ चतुर्थश्चतुरात्मा तुरीयावसितत्वादेकैकस्योतानुज्ञात्रनुज्ञाऽविकल्पैः ।**

**अथ चतुर्थ** इत्यादि । तस्य स्वरूपमाह—चतुरात्मेत्यारभ्याविकल्पैरित्यन्तम् । सर्वेषु प्रत्येकचतुरात्मत्वकथनं प्रणवस्य चतुर्मात्रत्वात्सर्वेषां पादानां प्रत्येकं प्रणववाच्यत्वायाग्रिमकण्डिकायां फलिष्यति । एकैकस्य वैश्वानरादेस्तुरीयावसितत्वादोतानुज्ञात्रनुज्ञाऽविकल्पै रूपैश्चतुरात्माचतुर्थः पादः । तथा च वैश्वानरस्य तुरीयावसितत्त्वात्तुरीय ओतस्तैजसस्य तथात्वादनुज्ञाता । प्राज्ञस्य तथात्वादनुज्ञारूपस्तुरीयस्य

तथात्वादविकल्प इत्यर्थः । शारीरस्य तुरीयांशतया तत्स्वरूपत्वाय सत्सरूपतां शारीरेऽतिदिशति—

**अयमत्रापि सुषुप्तं स्वप्नं मायामात्रं चिदेकरसो ह्यथायमादेशः ।**

अयमत्रापीत्यादि । तथा च यथा ब्रह्मपादत्रयं तुरीयेऽवसितमेवमेतत्त्रयमत्रावसितमतश्चिदेकरसः शारीरोऽपि चतुरात्मा । आदिश्यत इत्यर्थः । तेन चतुरात्मत्वांशेऽप्यारोपितमिवजघन्यमेव साधर्म्यमिति भावः । पूर्वोक्तं पादत्रयमपरब्रह्मात्मकं तुरीयाधारकमिति तुरीयस्य लक्षणमाह—

**न स्थूलप्रज्ञं न सूक्ष्मप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवं शान्तमद्वैतं मन्यन्ते ।**

नस्थूलप्रज्ञमित्यारभ्य मन्यन्त इत्यन्तम् । लक्षणमुक्त्वा तस्य मुख्यताबोधकं वाक्यमनुवदंस्तस्य बलमाह—

**स एवात्मा स एव विज्ञेय ईश्वरग्रासस्तुरीयस्तुरीयः ।**

ईश्वरग्रासस्तुरीय इति । ईश्वरं पूर्वोक्तं प्राज्ञं ग्रसतीतितथा । तत्साधर्म्यं जीव आह—तुरीय इति । तथा च मुख्यपादैकदेशस्वरूपलक्षणस्यात्र सत्त्वात्कार्ये ईश्वरग्रासत्वेऽप्यैकदेशिकसाधर्म्याच्चोङ्कारेणैकीकरणेऽयमणुरप्योङ्कारवाच्याभिन्नत्वेन

भावयितुं शक्य इत्यस्याप्योङ्कारवाच्यत्वमनेन रूपेणैवमारोपेण च भवतीत्यस्य नृकेसर्यभिन्न[त्व]मेव ज्ञेयमित्यर्थः ॥ १ ॥

प्रथमः खण्डः ।

## ॥ अथ द्वितीयः खण्डः ॥

**तं वा एतमात्मानं जाग्रत्यस्वप्नमसुषुप्तं स्वप्ने जाग्रतमसुषुप्तं सुषुप्ते जाग्रतमस्वप्नं तुरीयेऽजाग्रतमस्वप्नमसुषुप्तमव्यभिचारिणं नित्यानंदं सदैकरसं ह्येवं चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा मनसो द्रष्टा बुद्धेर्द्रष्टा प्राणस्य द्रष्टा तमसो द्रष्टा सर्वस्य द्रष्टा, ततः सर्वस्मादस्मादन्यो विलक्षणः ।**

**चक्षुषः साक्षी श्रोत्रस्य साक्षी वाचः साक्षी मनसः साक्षी बुद्धेः साक्षी प्राणस्य साक्षी तमसः साक्षी सर्वस्य साक्षी, ततोऽविक्रियो महाचैतन्योऽस्मात् सर्वस्मात् प्रियतम आनंदघनो ह्येवमस्मात सर्वस्मात् पुरतः सुविभातमेकरसमेवाजरममर-ममृत-मभयं ब्रह्मैवाप्यजयैनं चतुष्पादमात्राभिरोंकारेण चैकीकुर्य्यात् ॥**

अथास्मिंस्त्रिशरीरपरब्रह्मानुसंधानस्यैकीकरणमूलकत्वादेकीकरणं स्वप्रकारं वाच्यमित्याऽऽकाङ्क्षायां सोऽयमात्मेत्यारभ्य मकार इतीत्यन्तेन माण्डूक्यवत् प्रणवतद्वाच्ययोरभेदं बोधयन्नेव प्रणवमात्राणां ब्रह्मपादानां च परस्परं तादात्म्यमग्रे कार्यार्थं प्रतिज्ञाय परब्रह्मणस्तुरीयस्य स्वपादत्रय-

विलक्षणत्ववदेतस्यापि स्वपादत्रयवैलक्षण्यं बोधयितुं तं वा एतमित्यारभ्याभयमित्यन्तेन स्वरूपमस्योपपादयन्स्थानत्रय-व्यतिरिक्तत्वात्तुरीयाव्यभिचारित्वादिकं द्रष्टृत्वाद्दृश्यभिन्नत्वं तद्विलक्षणत्वं साक्षित्वादविक्रियत्वं महाचैतन्यत्वं सर्वापेक्षा-प्रियत्वेनानन्दघनत्वं सर्वापेक्षया पूर्वभातत्वेनैकरसत्वादिकं चोक्त्वा तेन न स्थूलप्रज्ञमित्यादिनोक्ततुरीयधर्मानस्मिन्बोधयित्वा तदवैलक्ष्यात् ब्रह्मैवेत्यनेन ब्रह्मत्वं विधाय अजयैनं चतुष्पादमित्यनेन चतुर्णां शारीरपादानामारोपितत्वाय शारीरस्य मायया चतुष्पादत्वं स्मारयन् पूर्णारोपाद्यैकीकरणं द्विधा विधत्ते—

**जागरितस्थानश्चतुरात्मा विश्वो वैश्वानरश्चतूरू-पोंऽकार एव । चतुरूपो ह्ययमकारः स्थूलसूक्ष्मबीजसा-क्षिभिरकाररूपैराप्तेरादिमत्त्वाद्वा ।**

**मात्राभिरोंकारेण वैकुर्यादिति ।** ततस्तत्प्रकारकथनार्थं पादमात्रयोस्तादात्म्यमाह—जागरितेत्यारभ्यादिमत्त्वाद्वेत्य-न्तेन । चतुरात्मत्वाच्चतूरूपोंकारात्मको विश्वोऽकारात्मा चतु-रात्मनः कथमेकरूपाकारात्मकत्वमित्याकांक्षायामकारस्यापि चतूरूपत्वं वदति—चतुरूपोह्ययमित्यादि । अयमिति । प्रणव-मात्रारूपः । स्थूलादीनि तु प्रातिलोम्येन परापश्यन्त्यादि-रूपाणि श्रुत्यन्तराज्ज्ञेयानि । अतो विश्वो यथा चतुरात्मत्वेन तथाऽकारोऽपि । अकारो वै सर्वा वागिति श्रुत्युक्तया सर्व

वाग्व्याप्त्या पादान्तरादिमत्वेनच सर्वव्यापिप्रथमपाद विश्वात्मक इत्यर्थः ।

स्थूलत्वात् सूक्ष्मत्वाद्बीजत्वात् साक्षित्वाच्चाप्नोति ह वा इदं सर्वमादिश्च भवति य एवं वेद । स्वप्नस्थानश्चतुरात्मा तैजसो हिरण्यगर्भश्चतूरूप उकार एव चतुरूपो ह्ययमुकारः स्थूलसूक्ष्मबीजसाक्षिभिरुकाररूपैरुत्कर्षा॰दुभयत्वाद्वा स्थूलत्वात् सूक्ष्मत्वाद्बीजत्वात्साक्षित्वाच्चोत्कर्षयति ह व ज्ञानसन्ततिं समानश्च भवति य एवं वेद । सुषुप्तस्थानश्चतुरात्मा प्राज्ञ ईश्वरश्चतुरूपो मकार एव। चतुरूपो ह्ययं मकारः स्थूलसूक्ष्मबीजसाक्षिभि॰र्मकाररूपैर्मितेरपीतेर्वा। स्थूलत्वात् सूक्ष्मत्वाद्बीजत्वात् साक्षित्वाच्च मिनोति ह वा इदं सर्व्वमपीतिश्च भवति य एवं वेद ।

एवं पादमात्रयोस्तादात्म्यं साधर्म्येण व्याख्यायैकीकरणप्रकारमाह—स्थूलत्वादित्यारभ्य य एवं वेदेत्यन्तम्। य एवं पादमात्रयेरैक्यं वेद स आरोपितैः स्थूलत्वादिभिः स्वीयमिमं पादं व्याप्नोति तदादिश्च भवतीति। एवमग्रेऽपि। तथाच पादमात्रे यथा धर्मसादृश्येन परस्परात्मिके तथा शारीरोऽपि ब्रह्मधर्मसदृशारोपितधर्मवत्वेन ब्रह्मैकीभूतो भावनीय इति भावः । मात्राणाममात्रकत्वात्कथं चतूरूपत्वमिति शंकाव्युदासायाऽऽह—

**मात्रामात्राः प्रतिमात्राः कुर्य्यात् । अथ तुरीय ईश्वरग्रासः स्वराट् स्वयमीश्वरः स्वप्रकाशश्चतुरात्मोतानुज्ञात्रनुज्ञाऽविकल्पैरोतो ह्ययमात्मा यथेदं सर्वमन्तकाले कालाग्निःसूर्योऽस्त्रैः ।**

**मात्रामात्राः प्रतिमात्राः कुर्यादिति** । तत्प्रकारस्तूक्त एव । एवं मात्रात्रयवाच्यत्वमस्य व्युत्पाद्य चतूरूपतुरीयस्वरूपत्वं व्याकर्तुं पूर्वं तुरीयस्येश्वरग्रासत्वकथनात् प्रसंजितं कार्येश्वरवादं च परिहर्तुमथेति भिन्नप्रक्रमेण तुरीयस्वरूपं वदिष्यंस्तुरीयस्यौतत्वनेश्वरग्रासत्वमनुज्ञातृत्वेन स्वराट्त्वमनुज्ञात्वेन स्वयमीश्वरत्वमविकल्पत्वेन स्वप्रकाशत्वमीश्वरग्रासादिभिरविकल्पान्तैः पदैरुक्त्वा तेन प्राज्ञस्येश्वरगुणसारत्वादेवेश्वरत्वं नतु स्वतः । स्वतस्तु तुरीय एवेश्वर इति तुरीयस्वरूपं बोधयित्वा शारीरस्याजया चतुष्पात्वाच्चतुरात्मतुरीयाभेद भावनोपायत्वेन दृष्टान्तानाह–ओतो ह्ययमात्मा यथेदमन्तकाले इत्यादिना । तत्रौतत्वे कालाग्निर्दृष्टान्तः । तथाच यथान्तकाले सर्वं कालाग्निरूपं तथा सुषुप्तौ सर्वमाध्यामिकं मायामयं शारीरे लीनत्वाच्छारीराभिन्नम् । यथा च शास्त्रतः सूर्यस्त्रय्यात्मा तथा शास्त्रतः शारीरोऽप्याध्यात्मिकसर्वात्मा । तथा च कैवल्योपनिषदि 'यस्मिन् लयं याति पुरत्रयं चे' त्युक्तं । 'स एव माया परिमोहितात्मा शारीरमास्थाय करोति सर्वं' मिति च ।

**अनुज्ञाता ह्ययमात्मा अस्य सर्वस्य, स्वात्मानं ददाति दर्शयति इदं स्वात्मानमेव करोति, यथा तमः सविता, अनुज्ञैकरसो ह्ययमात्मा चिद्रूप एव। यथा दाह्यं दग्ध्वा अग्निरविकल्पो ह्ययमात्मा अवाङ्मनोगोचरत्वाच्चिद्रूपश्चतूरूपः ओङ्कार एव। चतूरूपतो ह्ययमोङ्कारः ओतानुज्ञात्रनुज्ञाऽविकल्पैरोङ्काररूपैरात्मैव । नामरूपात्मकं हीदं सर्वं तुरीयत्वाच्चिद्रूपत्वा ओतत्वादनुज्ञातृत्वादनुज्ञात्वादविकल्परूपत्वाच्चाविकल्परूपं हीदं सर्वम् । नैव तत्र काचन भिदास्ति ।**

अनुज्ञातृत्वमस्योपपादयति । अस्य सर्वस्यात्मानं ददातीति । कथं ददातीत्याकाङ्क्षायामाह—यदीत्यादि यथा तमःसवितेत्यन्तम् । तमोवदन्तरासृष्टिरूपं यद्विकल्पबुद्धिवृत्यात्मकं सर्वं तत्स्वात्मकं कुर्वन् स्वात्मानं ददातीत्यर्थः । एवमग्रेऽपि । अविकल्पत्वस्यात्र सत्वेन दृष्टान्तानपेक्षणात्तद्बोधनाय हेतुमेवाऽऽह—अवाङ्मनसगोचरत्वादिति । एवं कल्पनया स्वरूपेण च ब्रह्मसाम्यं शारीरस्योक्त्वा तेन प्रणववाच्यत्वमाह—‘ चिद्रूपश्चतूरूप ॐकार एवेत्यारभ्योङ्काररूपैरित्यन्तम् । तथा च अयं वाचक ॐकार ओतादिभिश्चतुर्भिरोङ्कारवाच्यरूपैश्चतूरूपः । शारीरस्तु त्रयमत्रापीत्यादिनोक्तसारूप्यत्रयकल्पनयाऽविकल्पतासाम्येन च कृत्वा चतूरूपः इति वास्तविकचतूरूपोङ्कारवाच्यादभिन्न एवे-

त्यर्थः । एतमर्थं सम्यक्परिचाययितुं हेतूपूर्वकं विवेचयन्नाह–आत्मैवेत्यारभ्य विकल्परूपं हीदं सर्वमित्यन्तम् । तथा च तुरीयत्वचिद्रूपत्वाभ्यां मायामयं सर्वमात्मरूपं ओतत्वादिहेतुचतुष्केन च सर्वमविकल्परूपमत आध्यात्मिकं मायामयं सर्वमात्माभिन्नमिति फलितोऽर्थः ॥ एवमतिनिर्बन्धेन काल्पनिकचतूरूपाणामुत्तरोत्तरपर्यवसितत्वेनाविकल्पतानिरूपणप्रयोजनमाह–**नैव तत्र काचन भिदास्तीति** । तत्र, प्रणवप्रतिपाद्ये परे ब्रह्मणीत्यर्थः । तथा च ब्रह्मस्वरूपमीदृशमेवं सर्वात्मकं च । अर्थात् शारीरस्वरूपं तद्विलक्षणं स्यात् तदभिन्नं न स्यादिति हेतोरेवं निरूप्यत इति प्रयोजनोक्तिमुखेन स्वोक्तेऽनुकूलतर्क इव प्रदर्शितः ।

एवं शारीरस्य तुरीयाभिन्नत्वं तर्केणैव बोधयित्वा तुरीयस्यापि यत्तुरीयं रूपं तत्स्वरूपं तज्ज्ञानफलं चाऽऽह—

**अथ तस्यायमादेशो ऽमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत ओङ्कार आत्मैव, संविशत्यात्मनात्मानं य एवं वेद, एष वीरः ।**

**नारसिंहेनानुष्टुभा मन्त्रराजेन तुरीयं विद्यात्, एष ह्यात्मानं प्रकाशयति, सर्वसंहारसमर्थः परिभवासहः प्रभुर्व्याप्तः सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मबन्धहरः ।**

सर्वदा द्वैतरहित आनन्दरूपः सर्वाधिष्ठानः सन्मात्रो निरस्ताखिलाविद्यातमोमोहोऽहमेवेति । तस्मादेवमेवेममात्मानं परं ब्रह्मानुसन्दध्यादेष वीरो नृसिंह एव ।

द्वितीयः खण्डः

अथ तस्यायमादेश इत्यारभ्य य एवं वेदेत्यन्तेन । तस्येत्थविकल्परूपस्य । एवं प्रणवेन तुरीयात्मकतानुसन्धानोत्तरमात्मसुखसाक्षात्कारेण वीर्यवत्त्वे जाते एष वीर इत्यादिना प्रणवस्य मन्त्रराजस्य चैकार्थ्यात्तदङ्गीभूतेन मन्त्रराजेनापि तुरीयवेदनमुक्त्वाऽनुष्टुभा किमिति विद्यादित्याकाङ्क्षायां तत्र हेतुं वैष हीत्यादिनाहमेवेतीत्यन्तेनोक्त्वा फलितमाह-तस्मादेवमेवेममित्यादिना । तथाचैव स्वरूपसाजात्येन कल्पितसाधर्म्येणांशत्वेन चेमं परत्वेनानुसंध्यादेषवीर उपासको नृसिंह एवेति ॥ २ ॥

अथ तृतीयः खण्डः

तस्य ह वै प्रणवस्य या पूर्वा मात्रा सा प्रथमः पादो भवति, द्वितीया द्वितीयस्य, तृतीया तृतीयस्य, चतुर्थी ओतानुज्ञात्रनुज्ञाऽविकल्परूपा, तया तुरीयं चतूरात्मानमन्विष्य चतुर्थपादेन च तथा तुरीयेणानुचिन्तयन् ग्रसेत् ।

ततोनुष्टुभा तुरीयत्वेनेमं कथं विद्यादित्याकाङ्क्षायां तत्प्रकारमाह-तस्येत्यादिना ग्रसेदित्यन्तम् । तथाच पादत्रयं

यथायथं मात्रात्रयेन संपुटीकृत्य चतुर्थ्या नादरूपत्वेन केवलो-च्चारस्य कर्तुमशक्यतया ओतादिभिस्तत्स्वरूपैस्तुरीयमनु-चिन्त्य अनुचिन्तितरूपया तया तुरीयात्मकेन चतुर्थपादेन चानुचिन्तयन्, अर्थात् शारीरं ग्रसेदेकीकृत्य तदभिन्नमनु-संदध्यादित्यर्थः ।

**तस्य ह वा एतस्य प्रणवस्य या पूर्वा मात्रा पृथिव्य-कारः सऋग्भिः ऋग्वेदो ब्रह्मा वसवो गायत्री गार्ह-पत्यः, सा प्रथमः पादो भवति । भवति च सर्वेषु पादेषु चतुरात्मा स्थूल-सूक्ष्म-बीज-साक्षिभिः द्वितीयान्तरिक्षं स उकारः सयजुर्भिर्यजुर्व्वेदो विष्णु-रुद्रास्त्रिष्टुब्-दक्षि-णाग्निः, सा द्वितीयः पादो भवति । भवति च सर्व्वेषु पादेषु चतुरात्मा स्थूल-सूक्ष्म-बीज-साक्षिभिः । तृतीया द्यौः समकारः ससामभिः सामवेदो रुद्रादित्याजग-त्याहवनीयः, सा तृतीयः पादो भवति । भवति च सर्वेषु पादेषु चतुरात्मा स्थूलसूक्ष्म-बीज- साक्षिभिः ।**

**यावसाने अस्य चतुर्थ्यर्धमात्रा सा सोमलोक ओङ्कार सोऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेक ऋषिर्भास्वती स्मृता, सा चतुर्थः पादो भवति । भवति च सर्व्वेषु पादेषु चतुरात्मा स्थूल-सूक्ष्म-बीज-साक्षिभिः । मात्रामात्राः प्रतिमात्राः कृत्वा ओतानुज्ञात्रनुज्ञाऽवि-कल्परूपं चिन्तयन् ग्रसेत् ।**

तत्प्रकारमाह–तस्य ह्वा इत्यादिना, मात्रा मात्रा प्रतिमात्राः कृत्वा ग्रसेदित्यन्तम् । तत्र प्रतिमात्रं मात्राकरणस्यानुवक्ष्यमाणत्वात्पूर्वतापिन्यामिवात्रापि मात्राणां पदानां च माहात्म्यं वदन् प्रथममात्राया माहात्म्यं पृथिवीत्यादिनोक्त्वा तत्संपुटितत्वात्प्रथमपादस्य तदात्मकत्वमाह–सा प्रथमः पादो भवतीति । तेनोङ्कारमात्रावत् प्रथमपादस्य विश्वाभिन्नत्वं बोधितम् । विश्वस्य पादाभिन्नत्वं बोधयितुं प्रथममात्रायां मात्राकरणार्थमाह–भवति चेत्यादि, साक्षिभिरित्यन्तम् । एवमग्रेऽपि । तथा च मात्रावन्मन्त्रब्रह्मपादयोरैक्यं सर्वेषु पादेषु तद्रूपे आरोपेण शारीरपादोऽपि तदात्मको भवतीति सोऽपि मन्त्रराजवाच्य इत्येवं पूर्ववत्कुर्यात् । तदेतदनुवदन्नाह–मात्रेत्यादि ग्रसेदित्यन्तम् । अर्थस्तु पूर्वमुक्त एव ।

ज्ञोऽमृतोहुतसंवित्कः संविष्टो निर्विघ्न इममसुनियमेऽनुभूय इहेदं सर्व्वं दृष्ट्वासुप्रपञ्चहीनः । अथ सकलः साधारोऽमृतमयश्चतुरात्मा सर्व्वमयश्चतुरात्मा । अथ महापीठे सपरिवारं तमेतं चतुःसप्तात्मानं चतुरात्मानं मूलाग्नावग्निरूपं प्रणवं सन्दध्यात् । सप्तात्मानं चतुरात्मानमकारं ब्रह्माणं नाभौ सप्तात्मानं चतुरात्मानमुकारं विष्णुं हृदये, सप्तात्मानं चतुरात्मानं मकारं रुद्रं भ्रूमध्ये, सप्तात्मानं चतुरात्मानं चतुःसप्तात्मानं चतुरात्मानमोङ्कारं सर्व्वेश्वरं द्वादशान्ते, सप्तात्मानं चतुरात्मानं चतुःसप्ता-

त्मानं चतुरात्मानमानन्दामृतरूपं प्रणवं षोडशान्ते अथानन्दामृतेनैनांश्चतुर्धा सम्पूज्य, तथा ब्रह्माणमेव विष्णुमेव रुद्रमेव विभक्तांस्त्रीनेव अविभक्तांस्त्रीनेव लिङ्गरूपानेव च सम्पूज्योपहारैश्चतुर्धा। अथ लिङ्गान् संहृत्य तेजसा शरीरत्रयं संव्याप्य तदधिष्ठानमात्मानं सञ्ज्वाल्य तत्तेज आत्मचैतन्यरूपं बलमवष्टभ्य, गुणैरैक्यं सम्पाद्य महास्थूले महास्थूलं महासूक्ष्मे महासूक्ष्मं महाकारणे च संहृत्य मात्राभिरोतानुज्ञात्रनुज्ञाऽविकल्परूपं सञ्चिन्तयन् ग्रसेत् ॥ तृतीयः खण्डः ॥ ३ ॥

तदनन्तरकार्यमाह—ज्ञोऽमृत इत्यारभ्य ग्रसेदित्यन्तम् । तथा च ज्ञोऽमृतेत्यादिरूपः सन् प्राणायामेनैवंरूपत्वं स्वस्यानुभूय सुषुप्तस्वप्नमायामात्राख्यशारीरत्रयं सर्वपदोक्तं सृष्ट्वा सुतरां तादृशप्रपञ्चव्यतिरिक्तभूतः सकलादिरूपेण द्विविधचतुरात्मा सन् । ततो महापीठरूपे मूलाग्नौ सपरिवारं प्रणवमग्निरूपं संधाय सप्तात्मेत्यादिप्रकारेणोपहारैः संपूज्य ततः संहृत्य पूर्वं सृष्टं शरीरत्रयं तत्तेजसा संव्याप्य तदधिष्ठानं स्वं शारीरात्मानं संज्वाल्य तदनुसंधानमकृत्वा तेजोबलं प्राप्याभेदभावनायां सिद्धायां ब्रह्मगुणैरस्यैक्यं संपाद्य महास्थूलेत्यादिनोक्तप्रकारेण ब्रह्मणः शरीरत्रयं ब्रह्माभिन्नमनुसंधाय तुरीयमात्राभिस्तुरीयत्वमस्य चिन्तयन्नेवं तदैक्येन भावयेदित्यर्थः ॥ ३ ॥

## अथ चतुर्थः खण्डः ।

तं वा एतमात्मानं परमं ब्रह्म ओङ्कारं तुरीयोङ्काराग्रविद्योतमनुष्टुभा नत्वा प्रसाद्य ओमिति संहृत्याहमित्यनुसन्दध्यात् । अथैतमेवात्मानं परमं ब्रह्म ॐकारं तुरीयोङ्काराग्रविद्योतमेकादशात्मानमात्मानं नृसिंहं नत्वा ॐमिति संहरन्ननुसन्दध्यात् । अथैतमेवात्मानमात्मानं परमं ब्रह्मोङ्कारं तुरीयोङ्काराग्रविद्योतं प्रणवेन सञ्चिन्त्यानुष्टुभा सच्चिदानन्दपूर्णात्मसु नवात्मकं सच्चिदानन्दपूर्णात्मानं परमात्मानं परमं ब्रह्म सम्भाव्य अहमित्यात्मानमादाय मनसा ब्रह्मणैकीकुर्यात्, अनुष्टुभैव वा ।

एष उ एव नृ एष हि नृसिंहः सर्वत्र सर्वदा सर्वात्मा सिंहोऽसौ परमेश्वरः, असौ हि सर्वत्र सर्वदा सर्वात्मा सन् सर्वमत्ति ।

नृसिंह एवैकलः, एष तुरीयः, एष एवोग्रः, एष एव वीरः, एष एव महान्, एष एव विष्णुः, एष एव ज्वलन्, एष एव सर्वतोमुखः, एष एव नृसिंहः एष एव भीषणः, एष एव भद्रः, एष एव मृत्युमृत्युः, एष एव नमामि, एष एवाहम् । एवं योगारूढो ब्रह्मण्येवानुष्टुभं सन्दध्यादोङ्कार इति ।

तदेतौ श्लोकौ भवतः,

संस्तभ्य सिंहं स्वसुतानगुणर्द्धान्
संयोज्य शृङ्गैर्ऋषभस्य हत्वा ।
वश्यां स्फुरन्तीमसतीं निपीड्य
सम्भक्ष्य सिंहेन स एष वीरः ॥

शृङ्गप्रोतान् पदान् स्पृष्ट्वा हत्वा तामग्रसत् स्वयम् ।
नत्वा च बहुधा दृष्ट्वा नृसिंहः स्वयमुद्बभौ ॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥

---

ततोऽग्रिमकृत्यमाह-तं वा एतमित्यादिना । तथा च प्रणवानुष्टुब्भ्यां तथा कृत्वा शारीरं मनसा करणेन ब्रह्मणैकीकृत्य अनुष्टुवर्थरूपत्वं ब्रह्माभेदेन स्वस्य ज्ञात्वा योगारूढः सन्ननुष्टुभं प्रणववाच्यब्रह्मवाचिकं जानीयादिति श्लोकद्वयसहितकण्डिकार्थः ॥ ४ ॥

---

अथ पञ्चमः खण्डः ।

अथैष एवाकार आप्ततमार्थः । आत्मन्येव नृसिंहे ब्रह्मणि वर्त्तते, एष ह्येवाप्ततमः एष हि साक्षी, एष हि ईश्वरः ।

अतः सर्वगतः । नहीदं सर्वमेष हि व्याप्ततमः । इदं सर्वं यदयमात्मा मायामात्रमेष एवोग्र एष ह्येवाप्ततमः, एष एव वीर एष हि व्याप्ततमः । एष एव महानेष एव

व्याप्ततमः । एष एव विष्णुरेष हि व्याप्ततमः । एष एव ज्वलन् एष हि व्याप्ततमः, एष एव सर्वतोमुख एष हि व्याप्ततमः । एष एव नृसिंह एष हि व्याप्ततमः । एष एव भीषण एष हि व्याप्ततमः । एष एव भद्र एष हि व्याप्ततमः । एष एव मृत्युमृत्युरेष हि व्याप्ततमः । एष एव नमाम्येष हि व्याप्ततमः । एष एवाहमेष हि व्याप्ततमः॥ आत्मैव नृसिंहो देवो ब्रह्म भवति ।

य एवं वेद सोऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति ।

अथैष एवोकार उत्कृष्टतमार्थः। आत्मन्येव नृसिंहे ब्रह्मणि वर्त्तते । तस्मादेष सत्यस्वरूपो नह्यन्यदस्ति अमेयमनात्मप्रकाशमेष हि स्वप्रकाशोऽसङ्गोऽन्यं न वीक्षत आत्मा ।

अतो नान्यत्र प्राप्तिरात्ममात्रं ह्येतदुत्कृष्टम्, एष एवोग्र एष ह्येवोत्कृष्टः, एष एव वीर एष ह्येवोत्कृष्टः, एष एव महानेष ह्येवोत्कृष्टः, एष एव विष्णुरेष ह्येवोत्कृष्टः, एष एव ज्वलन्नेष ह्येवोत्कृष्टः, एष एव सर्वतोमुख एष ह्येवोत्कृष्टः, एष एव नृसिंह एष ह्येवोत्कृष्टः, एष एव भीषण एष ह्येवोत्कृष्टः, एष एव भद्र एष ह्येवोत्कृष्टः, एष एव मृत्युमृत्युरेष ह्येवोत्कृष्टः,

एष एव नमाम्येष ह्येवोत्कृष्टः, एष एवाहमेष ह्येवोत्कृष्टः, तस्मादात्मानमेवैवं जानीयादात्मैव नृसिंहो देवो भवति । य एवं वेद सोऽकामो निष्काम आप्तकाम आत्मकामः, न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति ।

अथैष एव मकारो महाविभूत्यर्थः आत्मन्येव नृसिंहे देवे परे ब्रह्मणि वर्त्तते, तस्मादयमनल्पोऽभिन्नरूपः स्वप्रकाशो ब्रह्मैवाप्ततम उत्कृष्टतम एतदेव ब्रह्म ।

अपि सर्वज्ञं महामायं महाविभूति, एतदेवोग्रमेतद्धि महाविभूति, एतदेव वीरं, एतद्धि महाविभूति, एतदेव महदेतद्धि महाविभूति, एतदेव विष्णुरेतद्धि महाविभूति, एतदेव ज्वलन्नेतद्धि महाविभूति, एतदेव सर्वतोमुखमेतद्धि महाविभूति, एतदेव नृसिंहमेतद्धि महाविभूति, एतदेव भीषणमेतद्धि महाविभूति, एतदेव भद्रमेतद्धि महाविभूति, एतदेव मृत्युमृत्युरेतद्धि महाविभूति, एतदेव नमाम्येतद्धि महाविभूति एतदेवाहमेतद्धि महाविभूति ।

तस्मादकारोकाराभ्यामिममात्मानमाप्ततममुत्कृष्टतमं चिन्मात्रं सर्व्वद्रष्टारं सर्व्वसाक्षिणं सर्व्वग्रासं सर्व्वप्रेमास्पदं सच्चिदानन्दमात्रमेकरसं पुरतोऽस्मात् सर्व्वस्मात् सुविभातमन्विष्याप्ततममुत्कृष्टतमं चिन्मात्रं

महाविभूतिं सच्चिदानन्दमात्रमेकरसं परमेव ब्रम्ह मकारेण जानीयात्, आत्मैव नृसिंहो देवः परमेव ब्रह्म भवति, य एवं वेद सोऽकामो निष्काम आप्तकाम आत्मकामः, न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति इति ह प्रजापतिरुवाच ॥

इति पञ्चमः खण्डः ॥ ५ ॥

एवं स्वस्मिन् ब्रह्माभेदभावनायां सिद्धायां दृढभूमित्वाय प्रणवमात्राणां मन्त्रराजपादानां च स्वस्वार्थवाचकत्वेऽपि तत्तद्धर्मपुरस्कारेण ब्रह्मवाचकत्वमेवेति प्रतिज्ञाय पूर्वोक्तमर्थं प्रकारान्तरेणोपपादयति–अथैषह्येवाकार आप्ततमार्थ इत्यादिना। तथा मात्राणां ब्रह्मवाचकत्वे सति पूर्वं या शरीरस्योङ्कारार्थता वक्तुमारब्धा सा न सिद्ध्यतीति तत्सिध्यर्थं परब्रह्मणो नृसिंहस्य साक्षित्वमाह–एष हि साक्षीति । तथा च स एवानेन मकारेणात्र वर्तत इति तदभिन्नत्वादयमप्यकारार्थ इति न तदसिद्धिरित्यर्थः। ननु व्यापको यः परमात्मा स कथमणुर्भवितुमर्हतीत्याकाङ्क्षायां तत्सामर्थ्येन समाधानमाह–एषईश्वरोऽतः सर्वग इति । तथा च कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वाद्व्यापकत्वेऽपि तथाभावो न विरुद्ध इत्यर्थः ।

ननु ब्रह्मणः सर्वगतत्वोक्तौ वस्त्वन्तरसत्ता प्राप्यत इति वस्तुपरिच्छेदेऽद्वयत्वव्याकोप इति शङ्कायामाह–अतो न हीदं सर्वमेष हि व्याप्ततम इति। सर्वगतत्वादेवेदं वस्त्वन्तरं न

भवति । नह्यन्तःस्थेऽग्नौ बहिः सर्वत्र व्याप्ते काष्ठत्वमवशिष्यते । यद्वा इदं सर्वमतो न एतज्जातं न, किन्त्वेष एव सर्वत्र तत्तद्रूपेण व्याप्तस्ततो वस्तुपरिच्छेदाभावान्नाद्वयत्वव्याकोप इत्यर्थः । तर्हि भेदप्रतीतिविषयभूतमिदं किमित्याकाङ्क्षायामस्य स्वरूपमाह–**इदं सर्वं यदयमात्मा मायामात्रमिति** । यदित्यन्तमुद्देश्यं शेषं विधेयम् । तथा च यद्भेदप्रतीतिविषयं तत् मायात्मकं शरीरस्यैव रूपं तेन शरीरे आरोप्यत्वेन शरीरत्रयं पूर्वं यदुक्त-मासीत्तदेतदित्यर्थः ।

एवं प्रासङ्गिकं परिहृत्य व्याप्ततमत्वेन प्राप्तं मन्त्रराजप्रत्येक-पदार्थरूपत्वमेष एवेत्यादिना वदन् प्रणवप्रथममात्राया मन्त्रराजावयवानां चैकार्थ्यं स्फुटीकृत्य तस्य व्याप्ततम-त्वाच्छरीरस्यापि तदभिन्नत्वेन मन्त्रावयवार्थत्वमिति प्रणवादि-वाच्यताऽस्मिन् सूपपन्नेति ज्ञापयन्न प्रतारकत्वाय फलमाह–**तस्मादात्मानमित्यारभ्याप्येतीत्यन्तेन** । एवमग्रेऽपि ।

उकारस्य ब्रह्मवाचकत्वात्सत्यस्वरूपत्वमुक्त्वा पूर्ववदेव प्रपञ्चस्य ब्रह्माभिन्नत्वमाह–**न ह्यन्यदस्तीत्यादिना** । तथा च अमेयमनात्मप्रकाशं यत्तत् अन्यन्नास्ति किंत्वेष हि स्वप्रकाश इति एतदात्मकमेव तत् । तत्र हेतुः–असङ्ग आत्मा अन्यन्न वीक्षते । यत एतद्वीक्षतेऽतो नेदं ततोऽन्यदिति तर्केणोपपाद्य फलितमाह–**आत्मतो नान्यदात्ममात्रं ह्येत-दिति** । शेषं पूर्ववदेव ।

एवमकारोकाराभ्यां तदर्थरूपेण शारीरज्ञानमुक्त्वाग्रे च मकारार्थत्वेनोक्त्वा मकारेणैतस्य शारीरस्य ब्रह्मत्वेन ज्ञानप्रकारमुपसंहारेऽपि सूचयन्नाह—तस्मादकारोकाराभ्यामित्यारभ्य जानीयादित्यन्तम् । ततः पूर्ववदेव फलमुक्त्वा व्याख्यानसमाप्तिं सूचयति—इति ह प्रजापतिरुवाचेति ॥ ५ ॥

---

## अथ षष्ठः खण्डः ।

ते देवा इममात्मानं ज्ञातुमैच्छन्; तान् हासुरः पाप्मा परिजग्रास; त ऐक्षन्त; हन्तैनमासुरं पाप्मानं परिग्रसाम इति । तमेवोङ्काराग्रविद्योतं तुरीयतुरीयमात्मानमुग्रमनुग्रं वीरमवीरं महान्तममहान्तं विष्णुमविष्णुं ज्वलन्तमज्वलन्तं सर्वतोमुखमसर्वतोमुखं नृसिंहमनृसिंहं भीषणमभीषणं भद्रमभद्रं मृत्युमृत्युममृत्युमृत्युं नमाम्यनमाम्यहमनहं नृसिंहानुष्टुभैव बुबुधिरे । तेभ्यो हासावासुरः पाप्मा सच्चिदानंदघनं ज्योतिरभवत् । तस्मादपक्वकषायमिममेवोङ्काराग्रविद्योतं तुरीयतुरीयमात्मानं नृसिंहानुष्टुभैवं जानीयात् । तस्य हासुरः पाप्मा सच्चिदानन्दघनं ज्योतिर्भवति ।

ते देवा ज्योतिष उत्तितीर्षवो द्वितीयाद्भयमेव पश्यन्त इममेवोङ्काराग्रविद्योतं तुरीयतुरीयमात्मानं वै नृसिंहानुष्टुभान्विष्य प्रणवेनैव तस्मिन्नवस्थिताः ।

तेभ्यस्तज्ज्योतिरस्य सर्वस्य पुरतः सुविभातमविभात-मद्वैतमचिन्त्यमलिङ्गं स्वप्रकाशमानंदघनं शून्यमभवत् । एवंवित् स्वप्रकाशं परमेव ब्रह्म भवति ।

ते देवाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च ससाधनेभ्यो व्युत्थाय निरहङ्कारा निरागारा निष्परिग्रहा अशिखा अयज्ञोपवीता अन्धा बधिरा मुग्धाः क्लीबा मूका उन्मत्ता इव परिवर्त्तमानाः,

शांता दांता उपरतास्तितिक्षवः समाहिता आत्मरतय आत्मक्रीडा आत्ममिथुना आत्मानंदाः प्रणवमेव परमं ब्रह्मात्मप्रकाशं शून्यं जानन्तस्तत्रैव परिसमाप्ताः।

तस्माद्देवानां व्रतमाचरन्नोङ्कारपरे ब्रह्मणि पर्यवसितो भवेत् । स आत्मनैवात्मानं परमं ब्रह्म पश्यति; तदेष

श्लोकः

शृङ्गेषु शृङ्गं संयोज्य सिंहं शृङ्गेषु योजयेत् ।
शृङ्गाभ्यां शृङ्गमाबध्य त्रयो देवा उदासते इति ॥

इति षष्ठः खण्डः ॥६॥

---

एवं कण्डिकापञ्चकेन तेषां पूर्णोपदेशे जाते तेषां सप्रणव-मन्त्रराजाहंग्रहोपासनया जातां प्रतिबन्धनिवृत्तिरूपामवान्तर-सिद्धिं तदग्रिमां च मुख्यवृत्त्या प्रणववाच्ये परिसमाप्तिरूपां सिद्धिमुपाख्यानपूर्वकमाह–ते देवा इत्यारभ्य सर्वया

षष्ठया । अत्रासुरो भाव एव पापजन्यत्वात्पाप्मा । एतं शारीरं, ओँङ्काराग्रविद्योतं, ओँकारस्य यदग्रं नादाभिधेयमविकल्परूपं तेन विद्योतो यस्य तादृशम् । तुरीयातुरीयेत्याद्युक्तरूपेणोभयविधं नृसिंहानुष्टुभा पूर्वोक्तरीत्या देवाः ज्ञातवन्तस्तदा सर्वात्मकत्वे तस्य ज्ञाते पाप्मनोऽपि तदभिन्नत्वात्तेन ज्ञानेन तस्य पाप्मनः सच्चिदानन्दघनज्योतिर्भावरूपावान्तरसिद्धिरभूत्तथापि भेदो न गत इति स्वाधिकारवशाद्भयं दृष्टवन्तस्ततः पुनरुपासनावृत्तौ तज्ज्योतिस्तद्भावमपहाय ब्रह्मण आनन्दाकारत्वात्तद्रूपं सत्स्वस्वरूपशून्यमभूत्तदा तस्यासुरत्वे निवृत्ते देवा जातविरागाः सन्तः प्रणवप्रतिपाद्यपरब्रह्मणः पाप्मशून्यकारित्वात्तत्स्वरूपं शून्यं जानन्तः प्रणवे परिसमाप्ता इति पूर्वापेक्षया तेषामुत्कृष्टाधिकाररूपा द्वितीया सिद्धिरभूदित्यर्थः । एतज्ज्ञापनार्थमुपासकस्य फलमुक्तम् ॥६॥

---

## अथ सप्तमः खण्डः ।

**देवा ह वै प्रजापतिमब्रुवन्, भूय एव नो भगवान् विज्ञापयत्विति । तथेत्यजत्वादमरत्वादजरत्वादमृतत्वादभयत्वादशोकत्वादमोहत्वादनशनायत्वादपिपासत्वादद्वैतत्वाच्चाकारेणेममात्मानमन्विष्योत्कृष्टत्वादुत्पादकत्वादुत्प्रवेष्टृत्वादुत्थापयितृत्वादुद्द्रष्टृत्वादुत्कर्तृत्वादुत्पथवारिकत्वादुद्ग्रासकत्वादुद्भ्रान्तकत्वादुत्तीर्णविकृतित्वाच्चोङ्कारेण परमं सिंहमन्विष्य,**

अकारमिम मात्मानमुकारपूर्वार्धमाकृष्य सिंही-कृत्योत्तरार्धेन तं सिंहमाकृष्य महत्त्वान्–महस्त्वान्–मानत्वान्–मुक्तत्वान्–महादेवत्वान् महेश्वरत्वान्–महासत्वान्—महाचित्त्वान्–महानन्दत्वान्—महाप्रभुत्वाच्च मकारार्धेनार्थेनैकीकुर्य्यात् ।

अशरीरो निरिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्द-मात्रः स स्वराड्भवति, य एवं वेद । कस्त्वमित्यहमिति होवाच, एवमेवेदं सर्व्वम् ; तस्मादहमिति सर्व्वाभि-धानं, तस्यादिरयमकारः स एव भवति । सर्वं ह्यय-मात्मा, अयं हि सर्वान्तरः, न हीदं सर्वं निरात्मकं, आत्मैवेदं सर्वं, तस्मात्सर्वात्मकेनाकारेण सर्वात्म-कमात्मानमन्विच्छेत् ।

ब्रह्मैवेदं सव सच्चिदानन्दरूपं, सच्चिदानन्दरूपमिदं सर्वं, सद्धीदं सर्वं, सत्सदिति चिद्धीदं सर्वं, काशते काशते चेति, किं सदितीदमिदं नेत्यनुभूतिरिति, कैषे-तीयमियं नेत्यवचनेनैवानुभवन्नुवाच, एवमेव सच्चिदानन्दौ, अथ वचनेनैवानुभवन्नुवाच, सर्वमन्यदपि, स परम आनन्दः, तस्य ब्रह्मणो नाम ब्रह्मेति, तस्यान्त्योऽयं मकारः स एव भवति; तस्मान्मकारेण परमं ब्रह्मान्विच्छेत् ।

किमिदमेवमित्यु इत्येवाहाविचिकित्सन् ; तस्मादकारे-णेममात्मानमन्विष्य मकारेण ब्रह्मणा सन्दध्यादुकारेणा-

विचिकित्सन्, अशरीरो निरिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्दमात्रः स स्वराड् भवति, य एवं वेद ।

ब्रह्म ह वा इदं सर्वममृतत्वादुग्रत्वाद्वीरत्वान् महत्वाद्विष्णुत्वाज्ज्वलत्त्वात् सर्वतोमुखत्वा–न्नृसिंहत्वाद्भीषणत्वाद्भद्रत्वान्–मृत्युमृत्युत्वान्–नमामित्वादहन्त्वादिति, सततं ह्येतद्ब्रह्म, उग्रत्वा द्वीरत्वान्–महत्त्वात् पुनःपुनरहन्त्वादिति; तस्मादकारेण परमं ब्रह्मान्विष्य मकारेण मनआद्यवितारं मनआदिसाक्षिणमन्विच्छेत् ।

स यदैतत् सर्वमुपेक्षते, तदैतत् सर्वमस्मिन् प्रविशति। स यदा प्रबुध्यते, तदैतत् सर्वमस्मादेवोत्तिष्ठति । स एतत् सर्वं निरुह्य प्रत्यूह्य सम्पीड्य सञ्ज्वाल्य सम्भक्ष्य स्वात्मानमेषां ददाति ।

अत्युग्रोऽतिवीरोऽतिमहानतिविष्णुरतिज्वलन्नतिसर्वतोमुखोऽतिनृसिंहोऽतिभीषणोऽतिभद्रोऽतिमृत्युमृत्युरतिनमाम्यत्यहं भूत्वा स्वे महिम्नि सदा समासते तस्मादेनं मकारार्थेन परेण ब्रह्मणैकीकुर्य्यादुकारेणाविचिकित्सन्; अशरीरो निरिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्दमात्रः स स्वराड् भवति, य एवं वेद । तदेष श्लोकः॥

शृङ्गं शृङ्गार्धमाकृष्य शृङ्गेणानेन योजयेत् ।
शृङ्गमेनं परे शृङ्गे तमनेनापि योजयेत् इति ॥

इति सप्तमः खण्डः ॥ ७ ॥

एवं जातायामप्यवान्तरसिद्धौ ब्रह्मणः शून्यत्वेन ज्ञाना- द्विद्याया अपूर्तिं स्वस्मिन् ज्ञात्वा देवाः पुनर्विशेषेण ज्ञापनार्थं चोदितवन्तस्तदा पुनस्ताः प्रजापतिस्तथेत्यङ्गीकृत्य सप्तम्यष्ट- मीभ्यां पूर्वोक्तोपासनां प्रकारान्तरेणाऽऽह—तत्र सप्तम्यां प्रणव- मात्राभिः पूर्वं द्विधोपासनं विदधाति। तत्र पूर्वमप्रजत्वादिभिः स्वरूपलक्षणभूतैर्दशभिर्हेतुभिः प्रणवप्रथममात्रयैनं विचार्योत्कृष्ट- त्वादिभिः सप्तभिर्हेतुभिः द्वितीयमात्रया स्वमनसि भगवन्तं सिंहं संनिधाय पूर्वोक्तेन भगवन्महाभूतिरूपेण मकारार्थेन शारीरेण सह महत्त्वादिभिर्हेतुभिर्दशभिः सिंहमभिन्नं भावयेदित्येकं प्रकार- मजत्वादित्यारभ्यैकीकुर्यादित्यन्तेनोक्त्वा शारीर इत्यारभ्य वेदेत्यन्तेन तत्फलमाह। एवं चात्र शारीरस्य विभूतिरूपत्वं भगवतस्तु विभूतिविभूतिमतोश्चैक्याच्छारीरस्यापि प्रणववा- च्यत्वसिद्धिः पूर्वस्मात्पक्षाद्विशेषः। ततोऽस्मिन्प्रकारेऽकारो निषेधार्थक इति प्रणवतुरीयपादस्यैव संग्रहो न तु पादत्रयस्यापी- त्यनेनापि प्रकारेण विभूतिरूपतैवास्य देवानां भास्यते न सर्वात्मकत्वं, अमुख्याधिकारित्वादिति विचिन्त्य देवप्रबोधनाय प्रकारान्तरमाह—कस्त्वमित्यारभ्य वेदेत्यन्तम्। तत्र कस्त्वमि- त्यादिना प्रकारस्य सर्वाभिधानत्वमुपपाद्य तेन जीवान्वेषणं वक्तुं शारीरस्य सर्वत्वमाह—सर्वं ह्ययमित्यारभ्यात्मैवेदं सर्व- मित्यन्तेन। सर्वस्य सात्मकत्वेन शारीरस्य सर्वान्तरत्वात्ता- त्स्थ्यात्तद्व्यपदेश इति सर्वात्मक इत्यर्थः। तथा सत्यकारेण शारीरान्वेषणमुक्त्वा प्रस्तुतसर्वस्य नास्मिन्पक्षे मायिकतेति-

बोधयितुं ब्रह्मैवेदं सर्वं सच्चिदानन्दरूपमित्युक्त्वा सच्चिदानन्दरूपमिदं सर्वमिति प्रतिज्ञाय तदुपपादयति—सद्धीदं सर्वमित्यारभ्य प्रकाशते चेत्यन्तेन । तथाच सर्वत्र सच्चिदन्वयेन सर्वं सच्चिद्रूपमित्यर्थः । एवमानन्दान्वयोऽपि प्रियत्वात्सर्वत्र ज्ञापितः ।

एवमन्वयेन सच्चिदानन्दात्मकत्वं साधयित्वा यद्रूपमिदं सर्वं तेषां सच्चिदानन्दानां स्वरूपं बोधयितुं प्रथमं किं सदितीति प्रश्नव्याजेन सदर्थे संदिह्य इदमिति भेदप्रतीतिविषयमर्थं सत्स्वरूपत्वेन संभाव्य इदं नेत्यनेन तदपोद्यापवादे हेतुमाह-इत्यनुभूतिरिति । इदं विकल्पबुद्धिविषयमेवंप्रकारकानुभवमात्रमेव, यतोत इदं न सदित्यर्थः । ननु यद्येवं तदानुभूतिः केन रूपेण सतीति वाच्यम् । यदि स्वेन, तदा सर्वस्थापि स्वेन स्वेनैव रूपेण सत्त्वमस्तु भेदानपायस्य तौल्यादित्याशयेन पूर्ववत्संदिह्य संभावयति—कैषेतीयमिति । या विकल्पबुद्धिविषयस्य लौकिकस्य स्वरूपत्वेनोच्यते एषानुभूतिः का यानुभूयते सा उतान्येति । एतस्याः स्वरूपमिदमेवान्यद्वेत्यर्थः । तत्रोत्तरमाह—इयं नेत्यवचनेनैवानुभवेन्नुवाचेति । एतस्मिन्निषेधमुखेनैतद्विलक्षणं सतः स्वरूपमुवाचेत्यर्थः । एवमग्रे चिदानन्दयोः यदुवाच तत्स्वयं श्रुतिराह-सर्वमन्यदपि स परम आनन्द इति । सर्वशब्दवाच्यः सदात्मप्रपंचः अन्यच्चिदानन्दौ च स परमेश्वरः परमानन्दात्मेत्यर्थः ।

एवं सर्वस्य ब्रह्मात्मकत्वमुक्त्वा प्रकारेण ब्रह्मान्वेषणं सहेतुकमाह—तस्येत्यारभ्यान्विच्छेदित्यन्तेन । अस्मिन्प्रकारे मात्राद्वयेनैवैकयभावनसिद्धिरित्युकारो व्यर्थः स्यादित्युकारस्य प्रयोजनमाह-किमित्यादि । यदर्थमिदं सर्वमुक्तं तदनुवदंस्तस्य फलमाह-तस्मादकारेणेत्यारभ्य वेदेत्यन्तम् । अस्मिंश्च प्रकारेऽकारः सर्वार्थकत्वात्पूर्वोक्तोपासनासिद्धः । शारीरश्च सर्वान्तरत्वात्सर्वात्मक इति व्यपदिश्यते तेनोभयोः सन्तमेव धर्ममादाय सदंशेनाकारेण सदंश[1]शारीरान्वेषणं ब्रह्म तु स्वभावादेव सर्वात्मकमिति प्रकारेण तदन्वेषणमिति गौण्या साधर्म्यमादाय ॐकारात्मकत्वभावनमिति पूर्वोक्तपक्षद्वयाद्विशेषः । पूर्वस्मादतिरिक्तं प्रकारमाह-ब्रह्मेत्यारभ्य वेदेत्यन्तम् । तत्र [2]शारीरे....एवं च द्वितीयकण्डिकायां प्रतिमात्राः कुर्यादित्यन्तेन यदेकीकरणमारोपपक्षेणोक्तं तदेकीकरणमारोपं विहाय व्यपदेशेनोक्तं तदग्रे यत्तत्रायं तुरीय इत्यादिनोक्तं तस्य पक्षान्तरं विहाय एष वीर इत्यादिना तथोक्तब्रह्मणैक्यस्य पूर्ववद्वक्ष्यमाणत्वाद् ब्रह्म वा इदं सर्वमित्यारभ्यामृतत्वादिभिस्त्रयोदशहेतुभिः सर्वस्य ब्रह्मत्वं बोधयित्वा सततं ह्येतद्ब्रह्मेत्यारभ्योग्रत्वादिद्वादशहेतुभिः प्रपञ्चस्य सर्वावस्थासु ब्रह्मरूपतां ब्रह्मपादत्वाय स्थिरीकृत्य सर्वस्योक्तस्यार्थस्याकारवाच्यत्वादकारेण मन्त्रराजपादा-

---

१ सदशेति क पाठ। २ त्रुटितोभागइति भाति ३ हरिरित्यक: कपुस्तके.

भिन्नेन ब्रह्मान्वेषणमुक्त्वा शारीरस्य ब्रह्मात्मकत्वाय ब्रह्मण एव मन आद्यविवृतत्वेन मन आदिसाक्षित्वेन विचारं वक्ति-मकारेणेत्यादिनाऽन्विच्छेदित्यन्तेन । ननु शारीरेण मन आद्यवनस्यानुभूयमानत्वाद्ब्रह्मणः कथं तथात्वमित्या-शङ्कायां तदुपपादयन्नाह–स यदीत्यारभ्य ददातीत्यन्तम् । तथा च प्रवेशादिभिरात्मदानां तैरयमेव जीवरूपेणावितेत्यर्थः। सर्वसाक्षित्वमाह–अत्युग्र इत्यारभ्य समासत इत्यन्तम् । तथा चालौकिकोग्रादिरूपत्वेन स्वमहिमस्थत्वात्साक्षात्यर्थः ।

एवमुभयरूपत्वं ब्रह्मणः साधयित्वैकीकरणफलं चाऽऽह–तस्मादित्यारभ्य य एवं वेदेत्यन्तम् । तथा चाकारार्थरूपमेव ब्रह्म मकारार्थभूतं तेन सह वेदस्यैक्यं मात्राभिर्भावयति तदा-यमपि केवलः सन् स्वमहिमस्थितो भवतीत्यर्थः । एतदेव श्लोकेन संगृह्याऽऽह–तदेष इत्यादि, एवं चात्र ब्रह्मणः सर्वा-त्मकस्य साक्षिरूपत्वात्तेनास्यैकीभावभावनेन प्रणववाच्यत्वं स्वस्वरूपलाभात्मकं फलं च भवतीति सिद्धम् ॥ ७ ॥

---

## अथाष्टमः खण्डः।

अथ तुरीयेणोतश्च प्रोतश्च ह्ययमात्मा सिंह्योऽस्मिन् हीदं सर्व्वमयं हि सर्व्वात्मायं हि सर्व्वं नैवोतोऽद्वयो ह्ययमात्मैकल एवाविकल्पो न हि वस्तु सदयं ह्योत इव सद्घनोऽयं चिद्घन आनन्दघन एकरसोऽव्यवहार्य्यः

केनचनाद्वितीयः ओतश्च प्रोतश्चैष ओङ्कार एवं नैवमिति पृष्ट ओमित्येवाह ।

वाग्वा ओङ्कारो वागेवेदं सर्व्वं न ह्यशब्दमिवेहास्ति; चिन्मयो ह्ययमोङ्कारश्चिन्मयमिदं सर्व्वम्; तस्मात् परमेश्वरएवैकमेव तद्भवति; एतदमृतमभयमेतद्ब्रह्म, अभयं वै ब्रह्म, अभयं हि वै ब्रह्म भवति; य एवं वेदेति रहस्यम् ।

अनुज्ञाता ह्ययमात्मा एष ह्यस्य सर्व्वस्य स्वात्मानमनुजानाति; नहीदं सर्व्वं स्वत आत्मवत्; नह्ययमोतो नानुज्ञाता असङ्गत्वादविकारित्वादसत्त्वादन्यस्य अनुज्ञाता ह्ययमोङ्कार ओमिति ह्यनुजानाति; वाग्वा ओङ्कारो वागेवेदं सर्वमनुजानाति, चिन्मयो ह्ययमोङ्कारः; चिद्धीदं सर्वं निरात्मकमात्मसात् करोति; तस्मात् परमेश्वर एवैकमेव तद्भवति; एतदमृतमभयमेतद्ब्रह्म, अभयं वै ब्रह्म, अभयं हि वै ब्रह्म भवति; य एवं वेदेति रहस्यम् ।

अनुज्ञैकरसो ह्ययमात्मा प्रज्ञानघन एवायं ह्यस्मात् सर्वस्मात् पुरतः सुविभातः, अतश्चिद्घन एव न ह्ययमोतो नानुज्ञाता आत्म्यं हीदं सर्वं सदेव, अनुज्ञैकरसो ह्ययमोङ्कार ओमिति ह्येवानुजानाति; वाग्वा ओङ्कारो वागेव ह्यनुजानाति; चिन्नयो ह्ययमो-

ङ्कारश्चिदेव ह्यनुजानाति; तस्मात् परमेश्वर एवैकमेव तद्भवति; एतदमृतमभयमेतद्ब्रह्म, अभयं वै ब्रह्म, अभयं हि वै ब्रह्म भवति; य एवं वेदेति रहस्यम् ।’

इति अष्टमः खण्डः ॥ ८ ॥

---

अतः परं तत्राथ तुरीय इत्यादिनोक्तस्यात्र प्रकारान्तरं व्यपदेशपदेनाऽऽह। तत्रात्मनात्मोपभोगरूपं फलमुक्तमिह तु ब्रह्मभावरूपं फलमाह–अथेत्यारभ्य संपूर्णकण्डिकया। तुरीयेण नादात्मकेन पादेन य एवं ओतादिरूपतया व्यपदिश्यमानं शारीरं ब्रह्म ।भिन्नं वेद सोऽभयं ब्रह्म भवतीति सर्वत्र संबंधः। तत्र पूर्वमोतश्चेत्यादि सिंह इत्यन्तेनोततयास्य सिंहत्वं प्रतिज्ञाय ओतत्वं व्युत्पादयति–अस्मिन्निदं हि सर्वमयं हि सर्वात्मेति। इदमिति विकल्पबुद्धिविषयम्। सर्वात्मा तादृशबुद्धिविषयात्मा। ननु सर्वात्मकत्वे आन्तरत्वाभावात्क्रियाद्यभावादोतत्वमस्य न युज्यत इत्याकाङ्क्षायां व्यपदेशपक्षत्वादिष्टमभ्युपगच्छन्नाह–अयं हि सर्वं नैवोत इति। सर्वत्वे हेतुमाह—अद्वयो ह्ययमात्मेति। अद्वय वासर्वः सर्वत्वान्नोत इत्यर्थः। अद्वयत्वमेव कथमित्याकाङ्क्षायां तद्व्युत्पाद्याऽऽह–एकल एवेत्यारभ्य द्वितीय इत्यन्तम्।सप्तम्यां हि मात्रात्रयेणैक्यभावनादाद्यो केवलतायां ग्वं महिमस्थत्वमुक्तं तथा वे स यथमेकल एवाविकल्पो भवति। निवृत्ते च विकल्पे तद्विषयस्यापि तस्यान्तरा सृष्टिरूपस्यापि निवृत्ता पूर्वप्रतीतं सर्वं नाह वस्तु

सत् । अयं हि तत्र ओत इवेति निश्चीयते । तत्र हेतुः—सद्घनोऽयमित्यादि । घनपदं पिण्डितवाचकत्वाद्बीजस्यैवास्य सूक्ष्माकारबोधकम् । तथाच स्वयं सर्वाकारोऽयं स्वसदृशाभासजननयोग्यत्वादोत इव व्यपदिश्यत इत्यर्थः । द्वितीयकण्डिकायामानन्दघनत्वस्योपपादितत्वात्तत्र युक्तिमनुक्त्वा, एकरसत्वस्य पूर्वमुपपादितत्वात्तेन चिद्घनत्वं साधयन्नेव सद्घनतावत्त्वे युक्तिमाह—अव्यवहार्यः केचनाद्वितीय इति । तथाच व्यवहाराभावेऽपि बीजवत्सर्वत्वात्सद्घनता बोधितेत्यर्थः ।

एवं शारीरस्य सर्वाकारत्वाद्व्यपदेशेन ओतत्वं साधयित्वा तथैव सर्वरूपतया तद्वाचकत्वाय प्रणवस्यापि व्यपदेशेनैवोतत्वं साधयति—ओतश्च प्रोतश्चोङ्कार इत्यारभ्यास्तीत्यन्तम् । तथाच, "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासत" इति न्यायेन ज्ञानमात्रं शब्दानुगतं, शब्दश्च वागात्मा वाक्चोङ्कारात्मिका सर्वमोङ्कारेणैवोत्तरणात् । अत ॐकारो वाचि प्रोतः वाक्चार्थप्रत्ययेनुगतेति सर्वत्र प्रतिभासिके ॐकार ओत इव व्यपदिश्यते । एवमुभयोरोतत्वं व्यपदेशेन साधयित्वा तेन शब्दार्थयोर्नित्यसंबंधादोतेनोङ्कारेणोतोऽयमेव वाच्य इति तेन बोधयित्वा मुख्यवृत्त्या वाच्यत्वायाऽऽह—चिन्मयेत्यादि सर्वमित्यन्तम् । एवं द्वेधापि वाच्यत्वं बोधयित्वा फलितमाह-तस्मादित्यादि एतद्ब्रह्मेत्यन्तम् । तस्मादेवं ओतत्वेन व्यपदेशात्तादृशोङ्कारवाच्यत्वाच्चिन्मयत्वाच्च आत्मा परमेश्वर एव । तत्र हेतुरेकमेवेत्यादि । यस्मा-

ब्रह्मैकमेवात एतदपि आत्मस्वरूपममृतमभयमत एतदपि ब्रह्मेत्यर्थः । एवं ज्ञाने फलमाह—अभयमित्यारभ्य वेदेत्यन्तम् । पूर्वप्रकारापेक्षयास्योत्कृष्टत्वायाऽऽह—रहस्यमिति । एवमेवानुज्ञातृत्वमपि व्यपदेश्यपक्षेनास्मिन्नाह—अनुज्ञातेत्यारभ्यानुजानातीत्यन्तम् । व्यवहाराभावेन्धकार इवा त्मलाभाभावादृव्यवहरणेन तत्तदात्मलम्भकत्वादनुज्ञातेत्यर्थः । नन्वेतं विना सर्वस्य कुतो नात्मलाभ इत्यत आह—न हीदं सर्वं स्वत आत्मवदिति । तथाच विकल्पबुद्धेर्जन्यत्वेन तद्विषयस्यापि मायामयस्य तथात्वादात्मानमन्तरेणाजननात्तथेत्यर्थः । तह्यस्तु स्वाभाविकमनुज्ञातृत्वं तन्नाऽऽह—न हीत्यारभ्यान्यस्येत्यन्तम् । पूर्वोक्तोपासनयाऽयं असङ्गः अतोऽजोऽनुज्ञाता अयमविकारी तेनान्तःस्थं सर्वमसदतोनोतः । अतस्तत्तद्रूपेण विवर्तमानत्वादोत इव तेनासङ्गतत्वादनुज्ञातेव व्यपदिश्यत इति न स्वाभाविकं तदित्यर्थः । यथात्र तथोङ्कारेप्यनुज्ञातृत्वं पूर्ववदाह—अनुज्ञातेत्यारभ्य करोतीत्यन्तम् । तथाच पुरुषगतमनुज्ञातृत्वं करणभूतेनोङ्कारेण व्यज्यत इति सोनुज्ञाता व्यपदिश्यते । सच्चवागभिन्न इति वाक् तथा । अनुज्ञाता चोङ्कारश्चिन्मयः तस्मिन् ब्रह्माभिन्नत्वस्य पूर्वमुक्तत्वात् । चिश्च विकल्पविषयस्यात्मसात्करणाज्ज्ञानाभावेऽनु ज्ञापनस्याभावाच्चानुज्ञातृता सा चोङ्कारस्य पूर्वरूपमतोऽपि तथा व्यपदिश्यत इत्यर्थः । एवं व्यपदेशेनोभयोरनुज्ञातृत्वं साधयित्वा पूर्ववत्फलितमाह—तस्मादित्यारभ्य रहस्यामित्यन्तम् । अर्थः

पूर्ववेदव । एवमेवानुज्ञातृत्वमस्याऽऽह—अनुज्ञेत्यारभ्य सदैवेत्यन्तम् । तथा च सर्वस्मात्पूर्वं भातत्वेन चिद्घनत्वादयं प्रज्ञानानां नानाविधबुद्धीनां घनात्मा तेन तत्प्रज्ञानघनत्वादनुज्ञारूपो व्यपदिश्यते । ओँकारश्च स्वरूपेण वाग्रूपेण चिन्मय वेव मुख्यगौणवृत्तिभ्यां तथा व्यपदिश्यते । तस्मात्तद्वाच्यत्वाच्चायं परमेश्वराभिन्न इति । शेपः समानोर्थः । अविकल्पत्वं पूर्ववदस्याऽऽह—अविकल्पेत्यारभ्योंङ्कार इत्यन्तम् । शारीरोऽर्थो द्वितीयः प्रणवः शब्दाऽद्वितीयश्चिन्मयश्च तस्मात्तेनरूपेणाप्योङ्कारवाच्यत्वादयं परमेश्वराभिन्नः । तत्र हेतुरेकमेव, तद्भवतीति । ननु परमेश्वरो वस्तुतः सर्वात्माऽयं तु व्यपदेशेनेति कथमयं तदभिन्न इत्याकाङ्क्षायां विरुद्धधर्माश्रयत्वरूपां युक्तिं वदन्संभावनायामनिष्टं भवतीत्याह—अविकल्पेत्यारभ्याश्नोतीत्यन्तम् । एवं सर्वं वोधयित्वा फलितमाह—तदेतद्द्वयं स्वप्रकाशमात्मैवेत्यादि । शेषं पूर्ववत् ॥ ८ ॥

---

## अथ नवमः खण्डः ।

देवा ह वै प्रजापतिमब्रुवन्निममेव नो भगवन् ओङ्कारमात्मानमुपदिशेति । तथेत्युपद्रष्टानुमन्तैष आत्मा सिंहश्चिद्रूप एवाविकारो ह्युपलब्धा सर्वत्र न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीयो मायया ह्यन्यदिव स वा एष आत्मा पर एवैषैव सर्वम्;

---

१—अत्र ख पुस्तके पङ्क्त्यन्त्रुटिताः ।

तथाहि प्राज्ञैः सैषाविद्या जगत् सर्वमात्मा परमात्मैव स्वप्रकाशोऽप्यविषयज्ञानत्वाज्ज्ञानन्नेव ह्यत्र न विजानाति। अनुभूतेर्माया च तमोरूपानुभूतेस्तदेतज्जडं मोहात्मकमनन्तं तुच्छमिदं रूपमस्य, अस्य व्यञ्जिका नित्यनिवृत्तापि मूढैरात्मैव दृष्टा।

अस्य सत्त्वमसत्त्वञ्च दर्शयति सिद्धत्वासिद्धत्वाभ्यां स्वतन्त्रास्वतन्त्रत्वेन सैषा वटबीज–सामान्यवदनेकवटशक्तिरेकैव।

तद्यथा वटबीज–सामान्यमेकमनेकान् स्वाव्यतिरिक्तान् वटान् स्वबीजानुत्पाद्य तत्र तत्र च सम्पूर्णं सन्तिष्ठति; एवमेवैषा माया स्वाव्यतिरिक्तानि परिपूर्णानि क्षेत्राणि दर्शयित्वा जीवेशावाभासेन करोति; माया चाविद्या च स्वयमेव भवति।

सैषा चित्रा सुदृढा बह्वङ्कुरा स्वयं गुणाभिन्नाङ्कुरेष्वपि गुणाभिन्ना सर्वत्र ब्रह्म-विष्णु–शिवरूपिणी चैतन्यदीप्ता।

तस्मादात्मन एव त्रैविध्यं सर्वत्र योनित्वमपि। अभिमन्ता जीवो नियन्तेश्वरः सर्वाहंमानी हिरण्यगर्भस्त्रिरूप ईश्वरवत् व्यक्तचैतन्यः सर्वगो ह्येष ईश्वरः क्रियाज्ञानात्मा। सर्वं सर्वमयं, सर्वे जीवाः सर्वमयाः सर्वावस्थासु

तथाप्यल्पाः, स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव ।

तस्मादद्वय एवायमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आत्मानन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगतः। सत्तामात्रं हीदं सर्वं सदेव पुरस्तात् सिद्धं हि ब्रह्म, न ह्यत्र किञ्चनानुभूयते ।

नाविद्यानुभवात्मनि स्वप्रकाशे सर्वसाक्षिण्येविपन्नद्वयेपश्यतेहापि सन्मात्रं सदन्यत् सत्यं हीत्थं पुरस्तादयोनिः स्वात्मस्थमानन्द-चिद्घनं सिद्धं ह्यसिद्धम्;

तद्विष्णुरीशानो ब्रह्मान्यदपि सर्वं सर्वगं सर्वम् । अत एव शुद्धोऽबाह्यस्वरूपो बुद्धः सुखरूप आत्मा । नह्येतत् निरात्मकमपि नात्मा पुरतो हि सिद्धो न हीदं सर्वं कदाचिदात्मा हि स्वमहिमस्थो निरपेक्ष एक एव साक्षी स्वप्रकाशः ।

किं तन्नित्यम्? आत्मनोऽत्र ह्येव न विचिकित्स्यमेतद्धीदं सर्वं साधयति ।

द्रष्टा द्रष्टुः साक्ष्यविक्रियः सिद्धो निरविद्यो बाह्यान्तर; वीक्षणात्, सुविस्पष्टस्तमसः परस्तात् ।

ब्रूतैष दृष्टो वेति, दृष्टोऽव्यवहार्योऽप्यल्पो नाल्पः साक्ष्यविशेषो नान्यः,

असुखदुःखोऽद्वयः परमात्मा सर्वज्ञोऽनन्तोऽभिन्नोऽद्वयः; सर्वदा संवित्तिर्मायया, नासंवित्तिः स्वप्रकाशः, यूयमेव, दृष्टः किमद्वयेन? न, द्वितीयमेव, न यूयमेव ब्रह्मेव, भगवन्निति ते देवा ऊचुः, यूयमेव।

दृश्यते चेन्नात्मज्ञाः, असङ्गो ह्ययमात्मा; अतो यूयमेव स्वप्रकाशाः। इदं हि सत्-संविन्मयत्वात् यूयमेव नेति होचुः; हन्तासङ्गा वयमिति होचुः। कथं पश्यन्तीति होवाच। न वयं विद्म इति होचुः। ततो यूयमेव स्वप्रकाशा इति होवाच; न च सत्-संविन्मयाः।

एतौ हि पुरस्तात् सुविभातमव्यवहार्यमेवाद्वयं ज्ञातो वैष विज्ञातो विदिताविदितात् पर इति होचुः।

स होवाच, तद्वा एतद्-ब्रह्माद्वयं बृहत्त्वान्नित्यं शुद्धं बुद्धं मुक्तं सत्यं सूक्ष्मं परिपूर्णमद्वयं सदानन्द चिन्मात्रमात्मैवाव्यवहार्यं केनचन तदेतदात्मानमोमित्यपश्यन्तः पश्यत; तदेतत् सत्यमात्मा ब्रह्मैव ब्रह्मात्मैव।

अत्र ह्येव न विचिकित्स्यमित्यों सत्यम्। तदेतत् पण्डिता एव पश्यन्ति; एतद्ध्यशब्दमस्पर्श-मरूप-मरस-मगन्ध—मव्यक्तव्य—मनादातव्य-मगन्तव्य-मविसर्जयितव्यमनानन्दयितव्यममन्तव्य-मबोद्धव्य-मनहङ्कर्त्तव्य-मचेतयितव्य-मप्राणयितव्य-मनपानयितव्य-मव्यान-

यितव्य-मनुदानयितव्यमसमानयितव्यमनिन्द्रिय-मविषय-मकरण-मलक्षणमसङ्ग-मगुण-मविक्रिय-मव्यपदेश्य-मसत्त्व—मरजस्कमतमस्कमज—मभायमप्यौपनिषदमेव सुविभातं सकृद्विभातं पुरतोऽस्मात् सर्वस्मात् सुविभातमद्वयं पश्यताहं सः सोऽहमिति ।

स होवाच, किमेष दृष्टोऽदृष्टो वेति; दृष्टो विदिताविदितात् पर इति होचुः; कैषा कथमिति होचुः; किं तेन; न किञ्चनेति होचुः; यूयमाश्चर्य्यरूपा इति न चेत्याह। ओमित्यनुजानीध्वं, ब्रूतैनमिति ज्ञातोऽज्ञातश्चेति होचुः । न चैवमिति होचुर्ब्रूतैवैनमात्मसिद्धमिति होवाच।

पश्याम एव भगवन्! न च वयं पश्यामो नैव वयं वक्तुं शक्नुम; नमस्ते भगवन्! प्रसीदेति होचुः; नभेत्तव्यं पृच्छतेति होवाच; कैषानुज्ञेति; एष एवात्मेति होवाच; ते होचुः; नमस्तुभ्यं वयं तव; इति ह प्रजापतिर्देवाननुशशासानुशशासेति । तदेष श्लोकः ॥

ओतमोतेन जानीयादनुज्ञातारमान्तरम् ।
अनुज्ञामद्वयं लब्ध्वा उपद्रष्टारमाव्रजेदिति ॥

इत्यथर्व-वेदोपनिषत्सु नृसिंहोत्तरतापनीयोपनिषत् समाप्ता ॥

॥ इति नवमः खण्डः ॥ ९ ॥

---

एवं ससम्यष्टमीभ्यां प्रणवव्यपदेशभाक्त्वं ब्रह्माभेदश्चास्योक्तः। तेनाप्यमृताभयरूपत्वाद्ब्रह्मत्वेनैवास्योङ्कारत्वं न सिद्धं न

स्वातंत्र्येण सर्वरूपतयेति । देवानां निश्चये संपन्ने देवा मुख्यवृत्त्या प्रणववाच्यं तदात्मकं परमेश्वरमेव सिंहं स्वात्मत्वेन ज्ञातुमिच्छन्तः पुनः प्रजापतिं विज्ञापयन्तीत्याशयेनाऽऽह–देवा इत्यारभ्योपदिशेत्यन्तम् । इममेवोङ्कारवाच्यं तदात्मकमस्मदात्मत्वेनोपदिशेदित्यर्थः । तदा प्रजापतिस्तथेत्यङ्गीकृत्योपदेक्ष्यन् उपद्रष्टानुमन्तैष आत्मा सिंह इत्यनेन द्रष्टृत्वादिनाऽनुभूयमानस्यास्य सिंहत्वं चिद्रूपत्वं प्रतिज्ञाय कथमित्याकाङ्क्षायां सिंहत्वे चिद्रूपत्वे च हेतुमाह-**अविकारो ह्युपलब्धा सर्वत्रेति** अविकारित्वात्सिंहः सर्वत्रोपलब्धत्वाच्चिद्रूप इत्यर्थः । ननु सर्वत्रोपलब्धारो नानाऽनुभूयन्त इति कथमेकस्यैव सर्वत्रोपलब्धृत्वमित्यत आह—न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीय इति । पूर्वोक्तप्रकारेणाद्वितीयत्वादयं परमात्मैव सिद्धः । अतोऽस्य ब्रह्मभावे व्यापकत्वान्न द्वैतासिद्धिरित्यर्थः । ननु सिद्ध इदानीं द्वैतोपलब्धेरित्याशङ्कायामद्वयत्वमुपपादयिष्यन्द्वैतस्यावास्तवत्वादिकं पूर्वमाह-मायया ह्यन्यदिव स वा एष आत्मा पर एवेति। स पूर्वोक्तप्रकारेणजया चतुष्पादेषोऽविकल्प आत्मा शारीरः पर एव मायया कृत्वा यथा अन्येषां पं[1]श्चिकं भिन्नं प्रतीयते तथाऽयमपि अन्य इव भासतेऽतो द्वैतोपलब्धिरवास्तवी तया जायत इत्यात्मा परमात्मैवेत्यर्थः । कथं तया जायत इत्याकाङ्क्षायां इयमद्वैते प्रतिबद्धय स्वयमन्तराविष-

---

१—प्रापञ्चिकमितिस्यात्

यीभवतीति जायत इत्याशयेनाऽऽह—एषैव सर्वमिति कथमिदं निश्चेयमित्याकाङ्क्षायामाह-तथाहि प्राज्ञाइति । सुषुप्साक्षिणोदं सिद्ध्यतीत्यर्थः । तदा यत्सिद्ध्यति तदाह-सैषाऽविद्या जगत्सर्वमात्मा परमात्मैवेति । सुषुप्तौ सर्वस्यास्मिन् लयादस्य च प्राज्ञैक्यात्तथेत्यर्थः । नन्वात्मा चेत्परमात्मैव तदा कथमस्य मायाया अज्ञानं, अज्ञत्वे च कथं तदैक्यं, माया च कीदृशी कथं सिद्धेत्याकाङ्क्षायां द्वयमपि तदनुभवेन संवादयति–स्वप्रकाश इत्यारभ्य तमोरूपानुभूतेरित्यन्तम् । ज्योतिर्ब्राह्मणोक्तरीत्या स्वप्रकाशोऽपि शारीरः सुषुप्तौ प्राज्ञपरिष्वङ्गेन तदैक्ये केवल एव तिष्ठतीत्यविषयज्ञानात्मकत्वात्तं स्वं च जानन्नपि । एवं जाग्रद्वत् भेदेन अत्र सुषुप्तौ न विजानातीति न किञ्चिदवेदिषमिति स्मरणान्यथानुपपत्त्या तज्जनकोऽज्ञत्वानुभवः स्वप्रकाशात्मा भिन्नोऽवसीयते । बाह्यस्य तमसस्तत्राभावात्स्वप्रकाशस्याज्ञत्वापादिका माया च तेनैवानुभवेनावसीयते । अत एव श्रुत्यन्तरे 'न बाह्यं वेद नान्तरमिति' सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेतीति । तथा च सा तमोरूपायं च परमात्मत्वेऽपि तया अज्ञ इत्यर्थः ।

नन्वस्तु तमोरूपा माया तथापीदं कथं मायात्मकं, न ह्यस्मिंस्तमोरूपत्वमनुभूयते येन तथाङ्गीक्रियते । न च सुषुप्तौ तददर्शनात्तथात्वं विप्रतिपन्नत्वादित्यत आह— तदेतज्जडं मोहात्मकमिदं रूपमिति । एवमचिद्रूपत्वादिदं

मायेत्यर्थः । तर्हि सेवेदमपि न प्रतीयेतेत्याशङ्कायां तस्याः कार्यमाह-अस्या व्यंजिकेत्यारभ्यास्वतन्त्रत्वेनेत्यन्तम् । तथा च ज्ञानिभ्यो नित्यनिवृत्तापि अस्या समंताद्व्यञ्जिकात्वान्मूढेभ्यो तया रीत्या यथायथं प्रपञ्चेऽस्मिन्स्वं प्रदर्शयतीतीदं प्रतीयते, आत्मभेदश्च भासते न तु वास्तवोऽतो न दोष इत्यर्थः।मूढदर्शनानुरोधेन प्राप्तस्य तन्नानात्वस्यापाकरणाय दृष्टान्तमुखेन तस्या एकत्वं सामर्थ्यं चाऽऽह— सैषेत्यारभ्यैकैवेत्यन्तम् । दुरूहत्वादृष्टान्तं व्याकुर्वन् दार्ष्टान्तिके विशेषमाह—तद्यथेत्यारभ्य भवतीत्यन्तम् । वटबीजं तूत्पाद्य वटेषु पूर्णं संतिष्ठतीयं तूत्पादने तत्र तत्र स्थाने चासामर्थ्याद्दर्शयन्त्येव दर्शयित्वा त्वाभासेन जीवेशौ करोति । यथाऽऽदर्शं दर्शयित्वा प्रतिबिम्बं तथा च तया स्वात्मकक्षेत्रदर्शने परमात्मनश्चन्द्रस्येव तथात्मांशप्रवेशने तस्य कार्येश्वरभावो भवति । आभासे द्वैविध्यार्थं स्वयं मायाऽविद्या भवतीत्येवं तस्याः सामर्थ्यमित्यर्थः ।

नन्वेवं तस्याः कथं नानारूपत्वं कथं चैवं सामर्थ्यमत आह-सैषेत्यादि दीप्तेत्यन्तम् । तथा च त्रिगुणभिन्नत्वान्नानात्वं परमेश्वरस्य गुणेन चैतन्येन दीप्तत्वाद्ब्रह्मादिरूपवती त्वेतेनैवमस्याः सामर्थ्यमित्यर्थः । ननु चैतन्यंदीप्तत्वेन दर्शकत्वमस्या भवतु न तु ब्रह्मादिरूपवत्तापीत्यत आह-तस्मादित्यादि योनित्वमपीत्यन्तम् । तथा च यस्मादियमाभासाधारभूता त्रिरूपवता तस्मादाभास्यः परमात्मापि त्रिविधः । आभासाभास्ययोः

समानरूपतादिनियमात् । यस्माच्चेयं दर्शयित्र्येव न तु जनयित्री दर्शनं च जननं विनानुपन्नं तस्मात्स्वयमेव योनिरितिरूपवत्ता-दर्शकत्वं च ब्रम्हधर्मसंक्रमणान्न विरुद्धम् । अतएव श्रुत्यन्तरे पुरुषं ब्रम्हयोनिमिति व्यासचरणैरपि 'योनिश्च हि गीयत' इत्युक्तम् । एतेनैव देशप्रकरण्याश्चित्रदीपे तापनीयश्रुतिं माया च तमोरूपेत्यादिकामुपन्यस्य जगतो मायामयत्वं मायायाश्च प्रकृतित्वेन योनित्वं प्रकटीकृतं तत्परास्तं बोध्यम् । त्रैविध्य-प्रसङ्गादन्यदपि त्रैविध्यं ब्रह्मण आह—अभिमन्तेत्यादि व्यक्त-चैतन्य इत्यन्तम् । जीवेश्वरहिरण्यगर्भभेदेन त्रिविध आत्मा। तत्रापि हिरण्यगर्भो ब्रम्हादिभेदेन त्रिरूप इत्यर्थः। एतदेव दृढी-कर्तुं पुनर्ब्रम्हणो माहात्म्यान्तरमाह—सर्वग इत्यादि ज्ञाना-त्मेत्यन्तम् । पञ्चमकण्डिकायां ईश्वरस्य सर्वगत्वं यदुक्तं तत्क्रि-याज्ञानरूपेणेत्यर्थः । ननु क्रियाज्ञानात्मा चेत्सर्वगस्तदा सर्वेषु ते कुतो न प्रतीयन्त इत्याकाङ्क्षायामाह—सर्वमित्यारभ्याल्पा इत्यन्तम् । भगवान् हि प्रजायेयेतीच्छयोच्चनीचभावेन क्रीडार्थं क्रियाज्ञाने तिरोधापयन् प्रपञ्चे जडरूपतां जीवे चाभिमन्तृत्वं धत्त इति विस्फुलिङ्गवदुच्चरिता जीवा अल्पत्वान्न जानन्ती-त्यर्थः । पूर्वोक्तं समर्थयितुं मायायाः करणत्वं च प्रकटयितुं अभिन्ननिमित्तोपादानतां प्रकटयन् लीलां तस्याह—स वा इत्या-रभ्य माययैवेत्यन्तम् । यदर्थमेतावन्निरूपितं तदद्वयत्वं परमेश्व-रस्य सर्वरूपत्वेन मायायाः व्यवहारकरणत्वकथनेन च सिद्धमिति तन्निगमयति—तस्मादद्वय एवायमात्मेति । य एवमद्वयत्वेन

सिद्धः स एवानेन प्रकारेण प्रविश्य व्यवहरणादेतच्छारीररूप इत्यर्थः ।

एवमस्य परमेश्वराभिन्नत्वं साधयित्वाश्रयस्य स्वरूपलक्षणानि द्वादशसंख्याकानि पूर्वोक्तरूपतायां प्रमाणत्वे वदन्नाह— सन्मात्रेत्यारभ्यावगत इत्यन्तम् । एतेषां च प्रमाणत्वमुत्तरोत्तरेण पूर्वपूर्वसाधने सिद्ध्यन्ति, प्रत्यग्ररसत्वं तु प्रत्यक्षादेव सिद्ध्यतीति तथा । एतैः परात्मधर्मैरस्मिन्वर्तमानैः परमात्माऽभिन्नत्वेनायमवगत इत्यर्थः ॥

एवं सिद्धेऽस्य परमात्माभिन्नत्वे स्वातन्त्र्येण सर्वात्मत्वबोधनार्थं यजमानःसर्वस्याविद्यकत्वनिराकरणाय सद्रूपत्वं पूर्वं साधयति सत्तामात्रं हीदं सर्वं सदेव पुरस्तादिति।धर्मधार्मिणोःप्रकाशाश्रयवदभेदात्सर्वं धर्मधार्मिभावभवनात्पूर्वं सदेवेत्यर्थः। तेनासत्कार्यवादाभावादाद्यन्तराहित्येनाविद्यकत्वं निराकृतं नित्यत्वं चोक्तम् । धर्मत्वकथनात्कृत्स्नप्रसक्तिरपि निरस्ता। सद्रूपत्वमेवमुक्त्वा तत्र हेतुमाह–सिद्धं हि ब्रह्म न ह्यत्र किञ्चनानुभूयत इति । अत्र ब्रम्हणि किञ्चन तदतिरिक्तं नानुभूयते अतो यदनुभूयते तत् धर्मरूपेण प्रकटं ब्रम्हैव नेतरदित्यर्थः । सप्तम्यां किं सदिति प्रश्ने अनुभवन्नुवाचेत्यनेन यदनुभव उक्तस्तदिदमेवमत्रोक्तम् । ननु पूर्वं सैषाऽविद्या जगत्सर्वमि यनेन विद्यात्मकत्वमुक्तमासीत्तद्विरुध्यत इत्याशङ्कानिरासायाऽऽह—नाविद्येत्यारभ्याद्वय इत्यन्तम् ।तथा च ईदृशो नास्ति अल्पोऽस्ति

जीवस्तत्रैव सा। तेन तादृशा यदनुभूतं तदेवाविद्यात्मकं नात्विद-मित्यर्थः । एतावता ओतत्वं ब्रह्मणि निश्चायितं शारीरेऽपि तदभिन्नत्वादेवमोतत्त्वपरिचायनायाऽऽह-पश्यतेहापि सन्मात्र-मसदन्यदिति। इह शारीरेऽपि पूर्वोक्तं सन्मात्रं पश्यत ।अन्यत् एतदतिरिक्तं विकल्पबुद्धिवृत्त्यात्मकमसत्पश्यतेत्यर्थः ।

ननु धर्मरूपं सर्वं नानाकारं तत्कथं सन्मात्रं पश्याम इत्या-काङ्क्षायां नानाकारत्वेऽपि सन्मात्रत्वमुपपादयति—सत्यं ही-त्यारभ्य सर्वगं सर्वमित्यन्तम् । पुरस्तात् सृष्टेः प्राक् । अयोनि अनुत्पादकं स्वात्मस्थं स्वरूपस्थं आनन्दचिच्छरीरं सिद्धम् तत् तदेवं विष्णुरीशो ब्रह्मा अन्यदपि प्रापश्चिकं सर्वं तदेव पूर्वप्रस्तुतं ब्रह्मैव। अतो विविधाकारत्वेऽपि अहिकुण्डलन्यायेन सन्मात्रावगतिर्न विरुद्ध्यत इत्यर्थः। अत एव सर्वगं सर्वमित्यपि तेनास्य ओतत्वं न विरुद्ध्यत इत्यष्टम्युक्तसच्चिदानन्दत्वेऽप्यो-तत्वं सिद्धमिति भावः ।

एतेनैवास्य शुद्धत्वाबाह्यत्वेऽपि सिद्धे इत्याह—**अत एव शुद्धोऽबाह्यस्वरूप आत्मेति**। यतः सर्वमविद्या तत्का-र्याभ्यां भिन्नमत एवेत्यर्थः ।

ननु सर्वं चेदेतद्ब्रह्मात्मकं तदा आत्मापि सर्वरूपस्तथा सति बाह्यमपि स एवेति कथमबाह्यस्वरूप इत्यत आह—**न ह्येत-न्निरात्मकमपीति**। एतदस्माभिरुच्यमानं यदि निरात्मकं स्यात्तथा, यतो नैवमतोऽबाह्य इत्यर्थः । कुतो न निरात्मकं

तत्राऽऽह—नात्मा हि पुरतः सिद्ध इति यथात्मा पुरतः वृत्ति-लाभस्थानेभ्यः पुरेभ्यः सिद्धो ज्ञातः स्यात्तथा नत्वेवमतः पुरात्मकमिदं न निरात्मकमित्यर्थः । पुरेभ्यः कुतो न सिद्ध इत्यत आह—नहीदं सर्वं कदाचिदिति । किन्तु सर्वदेत्यर्थः । तथा च यत इदं सर्वदा अतः पुरेभ्यो नात्मासिद्धिर्यउ एवमतः सर्वदा पुरं सदा सात्मकं, यतः सदा तथा, अतोऽविनाभावेन भेदस्यापादयितुमशक्यत्वात्प्रत्यग्रसत्वस्यास्मिन् सिद्धत्वादय-मबाह्य एवेत्यर्थः । तदेतत्सर्वं संकलय्याऽऽह—आत्मा हीत्यादि स्वप्रकाश इत्यन्तम् ।

ननु पूर्वं सृष्ट्वेत्यनेन सृष्टिरुक्ता तदनुरोधाच्च कादाचित्कत्वं वाच्यं तथा सति निरात्मकताप्यस्य सिध्यतीति तन्निरात्मकं किं आविद्यकमिदमेव वेति वाच्यमिति शङ्कायामाह-किं तदित्या-रभ्य विचिकित्स्यमित्यन्तम् । तत्र हेतुमाह-एतद्धीदं सर्वं साध-यतीति । एतद्ब्रह्म इदं सर्वं साधयतीत्यर्थः । कथमित्याका-क्षायां प्रकारमाह—द्रष्टेत्यारभ्य वीक्षणादित्यन्तम् । द्रष्टुः साक्षीति । स्वयं द्रष्टा द्रष्टुः शारीरस्यापि साक्षीत्यर्थः । तथा च यदायमात्मा बाह्यं वीक्षते तदा तदात्मकं तमः स्वशक्तिरूपं ततस्तिरकरोति सैव सृष्टिः यदा आन्तरं वीक्षते तदा तत्तमो बहिरावृणुते । स एव साधयतीति निरात्मकत्वमुपचर्यते न विचिकित्स्यमिति भावः । जीववदेव कुतो न करोतीत्यत आह-सुविस्पष्टस्तमसः परस्तादिति । एवं व्यक्तत्वात्तमो-

नियामक इत्यर्थः । तथा च जीवाविद्याकृतं निरात्मकमन्य-दिदमन्यत् । अत एतादृशपरमात्माभेदादस्यापि मुख्यमेवानुज्ञातृत्वं सिद्धमिति भावः ।

एवमुपदिश्योद्यमसाफल्याय पृच्छति ब्रूतेत्यादि । एवतापि तेषामंशात्मनोऽणुत्वेनान्तरेव ज्ञानं जातमिति त ऊचुः -दृष्टो व्यवहार्य इत्यादि । तच्चान्धहस्तिवदेकदेश्यमेवेति तदनुवदन् प्रजापतिराह-नाल्प इत्यारभ्याभिन्न इत्यन्तम् । अन्याभिन्न-पदाभ्यां भेदाभेद उक्तः । अद्वयपदेन ब्रह्मस्वरूपविचारेण भेद उक्तः । एवमुक्ते तेषां पुनरधिकं ज्ञानं जातमिति ते पुनराहुः—अद्वयेत्यादि दृष्ट इत्यन्तम् । मायया नासंवित्तिरिति । मायया असंवित्तिर्न किन्तु स्वप्रकाशो भवदात्मक एव दृष्ट इति । तत्र पुनराह-किमद्वयेनेति ततस्ते ऊचुर्द्वितीयामित्यादि भेदापादकत्वात्तदपि निषेधन् पुनराह-यूयमित्यारभ्य सत्सं-विन्मयत्वाद्यूयमेवेत्यन्तम् । पूर्वं ह्यवहार्यत्वमात्रं तैर्ज्ञातं ततः स्वप्नभिन्नत्वेन व्यापकतादिकं तेन तेषां हृदि स्वस्मिन् ब्रम्हभावो नास्फुरदिति स्फोरयितुं असङ्ग इत्यारभ्य सत्सं-विन्मयत्वाद्यूयमित्यन्तं प्रजापतिनोक्तम् । तदा तेषां किञ्चि-दधिकं ज्ञानं जातमिति तेनेत्यारभ्य होचुरित्यन्तमूचुः ।

एवमसङ्गत्वे स्वस्मिन् स्फुरिते ब्रह्मत्मभावोऽपि स्फुरि-तप्रायः, परं सप्रतीको वा पूर्णोऽत्र परीक्षार्थं पृच्छति-कथं पश्य-न्तीति । सर्वात्मत्वेनासङ्गा वा सर्वमिथ्यात्वेनासङ्गा वा

कथमसज्ज्ञा इति प्रश्नार्थः । तत्र तैः स्वाज्ञान उक्ते बोधनाय पुनराह—तत इत्यादि । स्वात्मज्ञा एव यूयं जाता न तु सच्चित्प्रचुराः पूर्णज्ञाना इत्यर्थः ।

इति तज्ज्ञानस्वरूपमुक्त्वा पुनरुपादिशति–एतौ हीत्यादि । एतौ इदंत्वेन भासमानौ सत्संविन्मयौ जीवजडौ सत्संविदावेव वा पुरस्तात्सुविभातं सन् घटः सन् पटः सन् जीव इत्येवं सर्वस्य पूर्वं सुतरां विशेषेण स्फुरितं अव्यवहार्यमेवाद्वयं ब्रह्मैवेत्यर्थः ।

एवमुपदिश्य पुनः पृच्छति–ज्ञातो वैष इति । ततस्तैर्विदिताविदितात् व्यष्टिसमष्टिप्रपञ्चात् परोऽस्माभिर्विज्ञात इत्युक्ते पुनरुपदिशति–तद्वा एतदित्यादि पश्यतेत्यन्तम् । भवद्भिः परत्वेनैव ज्ञातो न तु सर्वात्मत्वेनापि तेनाऽऽह–तत् पूर्वोक्तं सत्संविन्मयं, वै निश्चयेन, एतदेव यद्भवद्भिः परत्वेन ज्ञातं तदेव नतु ततोऽन्यत् । तत्र हेतुः–ब्रह्माद्वयमिति । यद्यन्यत्किञ्चिदपि स्यादद्वयत्वं भज्येतैवातो नेदं भिन्नमित्यर्थः ।

सम्यग्बोधयितुं ब्रह्मस्वरूपविचारेण धर्मान्तरानप्याह–बृहत्त्वादित्यारभ्य केनचनेत्यन्तम् । सूक्ष्मपदमणुत्वबोधकं न तु दुर्ज्ञेयत्वस्य, अव्यवहार्यपदवैयर्थ्यापातात् । सूक्ष्मपरिपूर्णपदाभ्यां विरुद्धधर्मसिद्ध्या द्वैतापत्तिरिति तद्वारणायाद्वयपदम् । तैः सर्वात्मकत्वे सति सर्वातिरिक्तरूपता न ज्ञातेति तदर्थं तव ज्ञानमनुवदन्नाह—तदेतमात्मानमोमित्यपश्यन्तः पश्यतेति । यद्भवद्भिरुपदेश्यत्वेन चोदितं तत् एतं विदितत्वेन

भवद्भिरुक्तमात्मानं ओँकारप्रतिपाद्यचतुष्पात्त्वेनापश्यन्तः इदानीं पश्यतेत्युपदेशः ।

एवमुपदिश्याप्रतारकत्वायाऽऽह—तदेतत्सत्यमित्यारभ्या-विचिकित्स्यमित्यन्तम् । तथापि तेषामज्ञाने अनिवृत्ते तेषां हीनाधिकारित्वं सूचयन्नाह इत्योँ सत्यमित्यारभ्य पश्यन्त इत्यन्तम् । इति इदानीमुक्तमात्मानं ओँप्रणवप्रतिपाद्यचतुष्पाद्रूपं सत्यं पण्डिता उत्तमाधिकारिण एव पश्यन्ति न तु हीनाधिकारिणः । एवं तादृशदर्शनानधिकारं तेषां बोधयित्वा सत्स्वरूपं पुनरुपदिशन्नभेदबोधनाय पुनरुपदिशति-तद्धीत्यारभ्य सोऽहमितीत्यन्तम् । तथा च यत्पण्डितैरोमिति दृष्टं तदेवैतादृशमद्वयं तदभिन्नमात्मानं पश्यतेत्यर्थः । पूर्वमुपदिश्य पुनः पृष्टे ततस्ते-ऊचुः-दृष्ट इत्यादि । पूर्वं हि ज्ञानमात्रमुक्तमिदानी दर्शनमुक्तं तेनेदमपरोक्षमिति ज्ञायते । तथा सति माया निवृत्ता । तदा ते पुनरूचुः । क्वैपेत्यादि । क्वैषा माया, क्व कथं स्थिता गता च कथमिति । एतावता ओतत्वमनुज्ञातृत्वं च तैर्ज्ञातमतः परमग्रिमं ज्ञापयितुं पुनराह-किं तेनेति । तज्ज्ञानेन तत्स्थितिगत्यादिज्ञानेन भवतां किं प्रयोजनम् । तत्रापि तैः प्रयोजनाभाव उक्तरिते पुनराह—यूयमाश्चर्येत्यादि । विलक्षणो भवदधिकारः न पूर्णज्ञाः मायया भगवदभिन्नत्वेन ज्ञानाभावात् । नाप्यज्ञा परमात्मनो दृष्टत्वात् । अतो मध्यमाधिकारिण इति । तदधिकारं अनूद्य पूर्वापेक्षयोत्तमत्वायाऽऽह-न चेति । यत् न किञ्चनेत्युक्तं मायास्थित्यादिज्ञानस्य निष्प्रयोजनकत्वं दतपि

न इत्युक्त्वा प्रणवविचारेणैव तेषां हीनत्वं गतमिति मध्यमतापि तत एव गन्त्रीत्याशयेन पुनः प्रणवोपासनामेवोपदिशति ॐ मित्यनुजानीध्वमिति । ॐ कारात्मतायां यच्छिष्टं तद् अनुभवतेति मदुक्त्यनन्तरं जानीध्वमित्यर्थः ।

एवमुक्त्वा तज्ज्ञानं परीक्षितुं पुनः पृच्छति—ब्रूतैवैनमिति । ततस्तैः पुनः स्वज्ञाने तदुक्ताज्ञाने च ज्ञात इत्यारभ्य न चैवमिति होचुरित्यन्तेनोक्ते पुनस्तज्ज्ञानाकारं पृच्छति—ब्रूतैवैनमात्मसिद्धिमिति । ततस्तैः पश्याम इत्यारभ्य होचुरित्यन्तेन दर्शनस्वकर्तृकादर्शनादिकथनात्प्रमेयबलाज्ज्ञापिते स्वमौढ्यदर्शनजगुरुकोपनिवृत्तौ विज्ञापितायामज्ञानशेषं मत्वा पुनः प्रश्नायाऽऽह—न भेतव्यं पृच्छतेति । ततस्ते ऊचुः-क्वैषेति । सर्वं ब्रह्मात्मकं ब्रह्म च सर्वत्रोतमनज्ञातृतदभेदादयं शारीरोऽपि तथेत्यस्माभिर्ज्ञातम् । परं यान्यथाज्ञानजनयित्री माया सास्माभिर्न ज्ञाता क्व कथं स्थिता, गता च कथमिति तद्वक्तव्यमिति शेषः। तदा प्रजापतिराह-अनुज्ञेति । तथा च ब्रह्माणि प्रणवात्मके या तुरीयस्य तृतीया मात्रा सेयमिति तत्रैव विकल्पबुद्धिरूपेण स्थितेत्यर्थः ।

एवं संपूर्णमुपादिश्याविकल्पतायाः पूर्वं ज्ञातत्वादुपदेशं समापयति श्रुतिः—एष आत्मेति द्वो वाचेति । परमाऽभिन्नत्वेनोपदिश्यमान आत्मा एषः पूर्णतयाऽभिरुक्त इत्यर्थः ।

एवमुपदेशे देवाः पूर्णज्ञानाः सन्तो गुरुं नत्वात्मसमर्प॰ गुरौ चक्रुरित्याह-ते हो चुरित्यारभ्य वयं ते इत्यन्ते॰ समाप्तिं द्योतयति इती हेत्यादिना। एतदेव श्लोकेन सं॰ ह्णाति-ओतमित्यादि । ओतेन ब्रह्मणा आन्तरं शारी॰ ओतमनुज्ञातारं जानीयात् । तादृशज्ञानेनानुज्ञां माया शक्तिं अद्वयं ब्रह्मैव ज्ञात्वा उप समीपे द्रष्टारं तमेव प्राप्नु यादित्यर्थः । अतोत्रान्तरा सृष्टिरेव मायिकी सिद्धा न भगवद्रूपाप्यस्तीति प्रपञ्चे न मायिकत्वलेशोऽपीति दिक् ।

इति श्रीवल्लभाचार्यचरणाब्जनखेन्दुभिः ।
स्वान्तःस्थेऽपहृते ध्वान्ते व्याचख्यौ पुरुषोत्तमः ॥

इति श्रीमद्विट्ठलेश्वरपदानुगेन श्रीमत्प्रभुपदसरोजसर्वस्वेन
पीताम्बरात्मजपुरुषोत्तमेन रचिता
नृसिंहोत्तरतापिनीदीपिका संपूर्णा ॥